No. १३८३

Title भवानन्दी प्रकाशे तर्कग्रन्थ प्रकाश:

Author महादेव पण्डित:

Extent ५३ Age —

Subject न्याय वैशेषिकं

भवानन्दीप्रकाशो तर्कग्रंथप्रकाश:

पत्राणि ५३

१२८२

स्तो॰
१२१५

भवा॰ व्टी॰
१

॥ श्रीगणेशायनमः ॥ ॥ तर्केनर्गलत्ववक्रोक्तितर्कसंपर्ककर्कशे । व्याख्यां कुर्वेमितरुचिरांशर
णं तत्र मे गुरुः ॥१॥ मूले व्याप्तिमूलकत्वेन व्याप्त्यादिनिश्चयजन्यत्वेनु व्याप्तिराधारकनिष्ठापा
धनिरूपिते व्याप्तिः आदिना पाधव्यतिरेकपक्षधर्मताव्छेदकादीनां परिग्रहः यावदितिय
त्रशंकादीनां परिग्रहः यावदितियत्रशंकायास्तर्कान्यस्मादनिवृत्तिस्तत्रैव शंकानिवृत्त्य
र्थं तर्कस्वीकार इति भावः तर्कं विनैव । तर्कान्तरं विनैव व्याप्तिग्रहः पूर्वतर्ककारणव्याप्त्या
दिनिश्चयसंभवः तथा च तत्रैव विश्रामात् नानवस्थेति भावः यत्रैतर्के व्याघातेनकस्या
अपि तत्कारणव्याप्त्यादिनिश्चयप्रतिबंधकशंकायाः अनवतारस्तत्र स्वतः सिद्धशंकावि
रहस्तत्वेन तन्निवर्तकतर्कान्तरापेक्षा विरहेण तत्तर्कमूलव्याप्त्यादिनिश्चयस्य तर्कान्तरं
विनैवसंभवेननानवस्थेति यदुक्तं टेवव्युत्स्याद्यपत्तितथाही स्यादिनादीधितौ तु ताधाने राम १
स्यादिनाव्यक्तेः कारणत्वनिश्चयप्रदर्शनमर्थान्तरस्य तस्मात आहव्याख्यायां व्याप्तिग्रा
हकेति पूर्वमूले इत्यादिः व्याप्तिग्राहप्रयोजकेत्यर्थः तर्केति धूमो यदि वह्निव्यभिचा
रीस्यात् । तदावह्निजन्यो न स्यादित्यादि व्याघाकारकतर्केत्यर्थः प्रस्तावइति तादिरहस्य

त्विति विपक्षबाधकतर्कादिति मूलेन उक्ते तत्रैवाग्रे नवस्थाभावप्रदर्शनादिति भावः। कार्य
कारणभावेति। अग्रे मूले इत्यादिः वह्निजन्यतादिग्रहप्रयोजकधूमो यदीत्या
दिव ह्म्यमाण तर्केत्यर्थः अर्थान्तरत्वमिति। पूर्वप्रदर्शितव्याप्तिग्राहकतर्कानवस्था
भावस्थलुत्वात् तस्यैव प्रकृतोपयोगित्वेन कार्यकारणभावग्राहकतर्कमित्यर्थः। कार्य
कारणभावग्राहकतर्केनवस्थाभावस्थलुत्वात्तस्य प्रकृतानुपयोगित्वादिति भावः
तत्तर्कोपपादकं तर्कमिति पाठः व्याप्तिग्राहकतर्कोपपादकं कार्यकारणभावग्राहक
तर्कमित्यर्थः कार्यकारणभावग्राहकतर्कस्य व्याप्तिग्राहकतर्कोपपादकत्वमिति याव
त् तच्च कार्यकारणभावग्राहकतर्कस्य व्याप्तिग्राहकतर्कोपपादकत्व द्वारा व्याप्तिग्रहप्र
योजकत्वपर्यवसन्नमिति। ननु हुताशनेत्यादिग्रंथस्य तर्कप्रदर्शकत्वेपि नासंगतिः दर्शय
ति हुताशनेत्यादिनेत्यादिनेति परिच्छेदकत्वादित्यतो नेति शेषः अत्र हुताशनेत्यादि
ग्रंथस्य वह्नेः कारणतानिश्चयप्रणालीप्रदर्शकतया तत्तर्कस्य व्याप्तिग्रहप्रयोजकत्वा
प्रदर्शकत्वादसंगतमेतदिति न शंक्यं अनुसंधेयस्त्वेत्यादिना व्याप्तिग्रहे कारणता

भवा॰टी॰
२

निश्चयाद्वेत्याद्याशयकमाणं तथा कारणतानिश्चये कारणतासंदेहनिरासद्वारा तर्को
पयोगस्य तत्र चाकारणत्वसंदेह इत्यादिना ग्रंथेन प्रदर्शनात् हेतुपो ह्यतेन वह्नेः का
रणतानिश्चयप्रमाणत्वात् हुताशने इत्यादिना दर्शितात् हुताशनेत्यादि ग्रंथस्य तर्कौ
व्याप्तिग्रहप्रयोजकत्वसंभवादारके चित् परिधूमवह्न्योः कार्यकारणभावनिर्णय
स्तदेव तत्संपादकतया धूमो यदीत्यादि कार्यकारणभावग्राहकतर्कस्य व्याप्तिग्र
हप्रयोजकता तासएवनसंभवति मंत्रिमत्राद्धिव्याप्तेन तत्प्रतिबंधकीभूतस्य धूमका
रणतायां हुताशनरासभादिघटितान्यतमत्वव्यापकत्वसंदेहस्य विद्यमानत्वात्तत
स्य तत्राप्रतिबंधकत्वे रासभाद्यव्यपि धूमकारणतानिर्णयः स्यादित्याशंकोद्धारकैः
अवश्यक्लृप्तव्यभिचारनिर्णयप्रतिबंधकत्व एवोपपन्नो तथाविधसंशयस्य त
त्रप्रतिबंधकत्वे मानाभावइत्यभिप्रायकोहुताशनइत्यादिग्रंथइतितस्य व्याप्तिग्रह
प्रयोजकत्वप्रदर्शकत्वसंभवइतिप्राहुः अन्ये तु धूमकारणत्वस्य क्वचिद्दप्य निर्णी
यसाधारण्यधर्मवद्भिन्नताज्ञानाभावेनैवसंशयाभावे तन्निरासद्वारा न तर्कस्योप

राम
२

योग इति हेत्वाभासनेत्यादिग्रंथेन सामान्यतोन्वयव्यतिरेकाभ्यां सामान्यतः कारणत्वनि
श्चयप्रदर्शनेन तद्विरोधिसंशयप्रसंभवप्रदर्शनेन निरुक्ततर्कस्य व्याप्तिग्रहप्रयोजकत्वं
प्रदर्शितमित्याहुः अत्र केचित् मूले व्याप्तिग्राहकतर्कानवस्थाभावप्रदर्शने यत्र
सव्याघातेन शंकैव नावतरतीत्युक्तं यत्र च साधने । व्याघातेन प्रतिबंधकादित्या
त तत्र व्याघात । वशात् शंकानवतारेप्यत्राहि दृष्ट इति दृष्टांतविधया दर्शयति मू
ले तथाहीत्यादिना तथा च व्याप्तिग्राहकतर्कप्रस्तावेपि व्याघातस्य विरोधिशंका
प्रतिबंधकत्वं क्व दृष्टमित्याशंकायां ~~प्रतिबंधकत्वं क्व दृष्ट~~ प्रतिबंधकत्वं क्व दृष्टमित्याशंका
यामेव दृष्टांतविधया कार्यकारणभावग्राहकतर्कप्रदर्शनात्तात्पर्यांतरत्वमित्या
हुः रासभघटितस्य । हेत्वाभासन रासभादिपदार्थस्यार्थस्य । तस्य । रासभादेः उ
क्तदिशा । उक्तक्रमेण । कारणताग्रहः धूमत्वावच्छिन्नं प्रति कारणताग्रहः कुतः
कथं । तस्मात् धूमध्वंक्ति विशेषेवन्हेः सम्भवति तादृन्यत्वस्येव रासभादेः सम्य

3

वह्नित्वान्यत्वस्यापि निर्णयसंभवेन धूमत्वसामानाधिकरण्येन वह्नेः अन्यतायाग्र
ग्रहासंभवादित्यन्यतायाः अपि तत्सम्बन्धघटितनिरुक्ततर्केण ग्रहसंभवादिति भावः इति
दूष्याशंकानिरासाय। निरुक्तेति। कार्यकारणभावग्राहके त्यर्थः। अकारणत्वसंभवे।
असंभवमिति कारणतासंदेहनिरासद्वारेण कारणतानिश्चये तर्कस्योपयोगे नाहेतुत्वनि
श्चये कारणतासंदेहाभावादिति भावः। आविष्कर्तुमिति तथा चाहेतुत्वनिश्चयोपदर्शनस्य
निरुक्तासंभवाविष्करणद्वारेणाशंकानिरासकतया प्रकृतोपयोगित्वमिति भावः। ननु व
ह्न्यसमवधानकालीनवह्नितद्व्यापारेतरयावत्कारणकत्वग्रहासंभवासमवधान
कालीनतत्तद्व्यापारेतरयावत्कारणकत्वस्य धूमेऽसत्वादिवाकारणे निरुक्ततर्कावता राम
रासंभवेऽहेतुत्वनिश्चयोपदर्शनं प्रकृतानुपयोग्येवेत्यत आह। वस्तुतस्त्विति यद्वाऽहे ३
तुत्वनिश्चयप्रदर्शनस्योक्तरीत्या प्रकृतोपयोगित्वसमर्थनेपि वह्नेः उक्तकारणस्तोमा
न्वयव्यतिरेकादेः प्रदर्शनस्य स्यप्रकृतोपयोगित्वमसमर्थितमेवेति तत्साधारण्येन त

त्समर्थ्यपतिवस्तुतस्त्वित्यादिना। अप्रयोजकत्वाशङ्कानिरासायाह तर्केत्यादिना। अथ व्याप्तिग्रहे प्र-
योजकत्वं पक्षान्तरज्ञानं तदुपपादयन्नेव तदाग्रहदर्शनस्य अनुकूलतर्कोपयोगित्वं दर्शयति व-
स्तुतस्त्वित्यादिना। अहेतुकत्वे तिन्नचकादिचित्कत्वहेतुकस्य कारणकत्वनिश्चयादेव त-
न्निरासः संभवतीति वाच्यं। कुत्रचित्कारणत्वग्रहं विनाऽकृत चित्कत्वे सकारणकत्वव्या-
प्तिग्रहासंभवात्। एतादृशि अवधारणे स्वार्थः वह्निसमवहिते तिपक्ष्य विशेषणस्ये-
त्यादिः वह्निसमवधाने ति। आपाद्यव्यतिरेकस्येत्यादिः रीभितो धूमस्य तद्धूमस्य
। एवमग्रेऽपि। अन्यतमभिन्नत्यादिः अत्रावधारणमन्यतमत्वसामानाधिकरण्येन
प्रत्येकधर्माभेदस्य योगेऽर्थवत्तायाः अन्यतमत्वावच्छेदेन तदसंभवात् इति ध्येयं। सं-
दिग्धइति। क्रियातद्विशेषणमाह। किमित्यादिनेतीत्यं तेन संदेहस्य कोटिद्वयसामा-
नाधिकरण्यमात्रावगाहित्वाभावेन धूमकारणत्वकोटेर्व्याघातसमुदायश्चेद्-
तिरिक्तवह्नित्वरूपावच्छेदकत्वविषयत्वलाभायसर्वाणीति कानिचिन्नस्येति इदं च

भवानं-टी
७

५ पूर्वावधारणस्य सामानाधिकरण्यमात्रावगाहित्वसंभवनायतेन पूर्वावधारणस्य प्र
तिबंधकत्वपक्ष एवायं संदेह इति शंकाऽपनीता । एतेन किं वा नेत्यत्रैव सामंजस्ये
कानिचिदित्यादिग्रन्थस्फुटेनिर्गलिताः किंचिदनुरक्तस्य समुच्चयत्वशंकानिराकरणा
य कानिचिदित्याद्युक्तं तेनावच्छेदकावच्छेदेन भावकोटेः सामानाधिकरण्यमात्रेण
चाभावकोटेर्लाभात्र कथं कानिचिदित्याद्युक्तमसंगतं । सर्वत्र्ये वेत्यत्रैवावच्छेदकाव
च्छेदेन भावकोटेर्लाभेन विरोधसंभवकथाकारेत्ल्लोरवेन न समुच्चयत्वशंकानिराकरण वद
संभवात् अन्यथाऽयं स्यात्तु नेवेत्यादावपि समुच्चयत्वशंकापादुर्वारित्वापत्तेः अ
न्ये तु कारणानीत्यंतं संदेहप्रदर्शकं एतानि किं कारणं सर्वाण्येव किंकारणमिति तात्प राम
र्यः किं वा कानिचिदित्यादिकं तु समुच्चयप्रदर्शकं न च पूर्वं संदिग्ध इत्युक्त्वा समुच्चयो ७
क्तेः प्रवृत्तत्वमिति वाच्यं संदिग्ध इत्यस्य कोटिद्वयज्ञानवानित्यर्थकत्वेन तस्यापि प्रवृ
तत्वादित्याहुः कानिचित्त्रेतिद्वंद्वे च सामानाधिकरण्यमात्रेणाभावे कोटिविषयतो

ण्याभावप्रत्येवं वन्ह्यादिघटसमाजेऽपि धूमकारणत्वग्रहापत्तिस्तथा च तृणारणिम
णिन्याये न कारणत्वसंदेहस्य निरास इत्यत आह तत्र चेति । उक्तसंदेहे चेत्यर्थः । यत्स
रासभाद्यैः तथाविधेभ्यः उक्तान्वयव्यतिरेकग्रहविषयजातीयेभ्यः धूमोत्पत्तिं धूमं
तस्येत्यत्र अहेतुत्वं धूमत्वावच्छिन्नाहेतुत्वं । न चैवमपि तद्धूमत्वावच्छिन्नाहेतुत्वसं
देहस्यानिवृत्तिरेवेति वाच्यं । यत्सामान्ये यत्सामान्यं प्रयोजकं तद्विशेषेण विशेष
इति न्याये न रासभत्वावच्छेदेन धूमत्वावच्छिन्नहेतुत्वावधारणे तन्निवृत्तिसंभवात्
यस्य च वन्हेः तादृशेति । उक्तान्वयव्यतिरेकग्रहविषयजातीयेत्यर्थः । यत्तु तत्तु यस्य
च व्यतिरेके तद्विशिष्टस्यले । तादृशेति । तत्र व्यापारेतरसकलधूमकारणसत्वे
पीत्यर्थः धूमानुत्पत्तिर्धूमस्य तदव्यवहितोत्तरक्षणसंबंधाभावरूपवन्ह्यसम
वहितानन्यत्वं । एतेन धूमे वन्ह्यसमवहितानन्यत्वस्य वन्ह्यसमवधानकालीन
वन्हितत्समवधानेतरयावत्कारणकत्वस्य च निश्चयोपि स्फुटितः । इत्थं च व्यापकाभा

मुक्तस्य यस्य च व्यतिरेकेपीत्यादिग्रंथे वह्न्यसमवहिताजन्यत्वादिप्रदर्शकत्वस्या
प्युपपत्तिः। नन्वेवं क्रमेण प्रत्यक्षितः कार्यकारणभावग्रहे तर्कानुपयोग इत्य
त आह तत्र चेति। कारणत्वनिश्चये चेत्यर्थः सहचारदर्शनिरूपितत्वं विरोधिता
त्वधि विरोधितां प्रतिबंधकतां आसादयन् प्राप्नुवन् इदं च ग्राह्यसंशयस्य विरोधित्व
माश्रित्य। निवर्त्यते प्रतिबध्यते। तं। तर्कं। ननु वह्निजन्यताग्राहकतर्केण वह्निजन्य
त्वशंका निरासेपि वसंभवति। न तु वह्न्यभावकारणत्वसंदेहनिरास इत्यत आह व्याप्या
यं धूम इति। समानेति। तथा च जन्यताग्राहकस्यापि तुल्यविधितर्के वेषतया कारणता
ताग्राहकत्वयात्तस्यापि ताद्दशाशंकानिवारकत्वमिति भावः। इदं अकारणत्वसं राम ५
देहस्य वह्निजन्यताग्राहकतर्कनिवर्त्यत्वाभिधानं। स्वारसिकसंदेहस्य अन्यालपी
कारणत्वसंदेहस्य व्याप्यवत्ताज्ञाने नैव। वह्न्यजन्यत्वव्यापकवह्न्यसमवहिताज
न्यत्वविशिष्टवह्न्यसमवधानकालीनवह्नितत्समवधाने नैव। वह्न्यजन्यत्वव्यापकत

तादृशयावत्कारणकत्वरूपजन्यत्वाभावप्रतियोगिनिरूढजन्यत्ववानित्याकारकेण वह्नि
जन्यत्वाभावव्यतिरेकव्याप्तिविशिष्टवत्तानिर्णये नैव विरहसत्त्वात्। विशेषदर्शनमु
द्रया प्रतिबंधात् तथा च किमापाद्याहार्यज्ञानात्मकतर्केणेत्याशयः अन्योन्य
ज्ञानं तर्ककारणमेव न परंतु आपाद्यव्याप्यापादकवत्तायाः संशयसाधारण
मेव ज्ञानं तस्य च वह्निजन्यत्वाभावादिनिरूपितव्याप्याद्यविषयकत्वान विशेष
दर्शनरूपत्वेति कथं तर्कजनकज्ञानं संशयनिवर्तकमिति चेन्न आपाद्यनिरूपिता
पादकव्याप्तेर्व्यापकसामानाधिकरण्यरूपतया व्याप्तिज्ञानस्य तादृशजन्यत्वा
भावे वह्निजन्यत्वव्यापकत्वविषयकतया पाद्यव्यतिरेकनिर्णयहेतुत्वानुरोधेन
च तादृशजन्यत्वाभावे वह्निजन्यत्वव्यापकत्वविषयकतया पाद्यव्यतिरेकनिर्णयहे
तुत्वानुरोधेन तत्तादृशजन्यत्वनिर्णयस्य सत्त्वोपगमेन वह्निजन्यत्वव्यापकता
दृशजन्यत्वाभावप्रतियोगितादृशजन्यत्ववत्तानिर्णयत्वेनैव तर्कप्रतिलाघवेन

भक्तानं.टी
६
6

हेतुत्वात्। न चैतादृशज्ञानस्यैव हेतुत्वे पक्षे आपाद्याग्रहेपि तर्कः स्यादिति वाच्यं। आपा
द्यकवत्ताग्रहस्याविसंशयसाधारण्यस्य तार्किकवृद्धैस्स्वातंत्र्येण हेतुत्वात्। न चैवं ता
दृशव्याप्यवत्तानिर्णयत्वेन हेतुत्वे वह्न्यजन्यत्वाभावादनुमितिरेव स्यात्तन्नतु तर्कः। भि
न्नविषयेनुमितिसामग्र्या बलवत्वादिति वाच्यं। तर्कस्याहार्यज्ञानरूपतयाइच्छा
घटिततत्सामग्र्या प्रतिबंधादेवानुमितेरनुत्पादसंभवात्। अयमिति भकारेण त
संदेह इत्यर्थः तथा चानाहार्यसंदेहस्य तर्ककारणीभूतव्याप्यवत्ताज्ञानेनैव निरासे
प्याहार्यसंदेहनिरासार्थं तर्कानुसरणमावश्यकमित्याशयः। एवं च दीधितावकारणत
संदेह इत्यस्याहार्येत्यादिः तस्य आहार्यसंदेहस्य। अविरोधित्वइति ग्राह्यसंशय राम
स्याप्रतिबंधकत्वादितिभावः। तत्सामग्री आहार्यसंदेहसामग्री तथाविरोधिनी इच्छा ६
घटितसामग्र्या बलवत्वादित्याशयः एवं च दीधितौ विरोधितां स्वसामग्र्याः प्रतिबंध
कतां आसादयन् स्वात्मकफलेन संपादयन् इत्यर्थः तेनाहार्यसंदेहस्याविरोधित्वेपि

नासंगतिः नन्वेवं तर्कस्याहार्यशंकाप्रतिबंध एव फलमिति पर्यवसन्नं तत्कथमुपप
द्यतां आहार्यज्ञानस्याप्रतिबंधकत्वात्प्रतिबध्यत्वाच्चेति चेन्मैवं । तर्कात्मकापाद
ज्ञाने सति तस्य प्रमितापाद्यव्यतिरेकात्मकतादृशजन्यत्वविरुद्धार्थविषयकतया
तत्र दुःखसाधनताग्रहाधीनो द्वेषः ततश्च तदापादकैव न्यायजन्यत्वे प्रमितविरुद्धा
र्थविषयकरूपद्विष्टसाधनताग्रहाधीनो द्वेषस्तत्तत्ज्ञाने द्वेष इति सति तापा
दकज्ञाने द्वेषे इच्छा नोत्पत्तुमर्हतीति इच्छाविघटनद्वारा तर्कस्य फलानुत्पत्तिर्नैव
स्वरूपं संशयप्रतिबंधकत्वं । न च प्रमितविरुद्धार्थविषयकज्ञानजनकत्वस्वरू
पयोग्यताया आपादकज्ञाने फलजननात्प्रागपि सत्वेन तत एव द्वेषो जायतां
किमंतरा तर्केणेति वाच्यं । आपाद्यग्रहरूपतर्कं विना प्रमितविरुद्धार्थविषय
कज्ञानजनकत्वज्ञानासंभवेन तदुपयोगात् सति च तादृशाग्रहे फलोपधाय
कत्वनिर्णयात्तादृशो द्वेष इति तर्के आहार्यसंदेहनिवर्तकत्वमर्थवशात्संपन्नं

भवानं° टी°
७

मेव अत एवापादकांशे संशयात्मकज्ञानमपि तर्के हेतुः अन्यथा तन्निर्णयस्यैव हे
तुत्वे कारणीभूते आपादकनिर्णय एव तर्कात्मक द्विष्ठसाधनताज्ञानसंभवे
पि संशये द्विष्ठसाधनताज्ञानाभावेन तत्रेष्टोपस्थितौ बाधकाभावेनाहार्यशंका
निवर्तकत्वस्यासंभवात् केचित्तु तर्कात्मकमापाद्यज्ञानं तर्कत्वाख्यमानसत्व
व्याप्यजातिविशेषवत्। तत्र चापाद्यव्याप्यापादकवत्तांशे संशयसाधारणं
ज्ञानं हेतुः एवं च तदापादकतर्कत्वेन तत्संशयत्वावच्छिन्नं प्रतिस्वातंत्र्येण प्र
तिबंधकत्वं अत एव वह्निनिश्चयदशायामापादकज्ञानजन्यतर्कात्मकबुद्धौ सत्याम
पि संशयप्रतिबंधः अन्यथा तत्र तर्के कारणीभूतपूर्वोक्तव्याप्यवत्ताज्ञाना राम ७
भावात्संशयप्रतिबंधो न स्यादित्याकूतमित्यंते। संशयत्वस्यार्थसमाजग्रस्त
तया तत्पावच्छेदकमशक्यत्वादिति दिक् दीधितौ धूम इत्यादीति अत्र धूमवि
शेषवत्त्वपक्षयुक्ति ध्येयं व्याख्यायां प्रकृते तर्कमूलीभूतोक्ततर्कस्येत्यादिः व्याप्तिग्रह प्र

योजकत्वाऽदर्शनादिति भावः प्रतिपाद्यस्य बोधकीयस्य कार्यकारणभावग्रहेति तत्र
दीधितौ कार्यकारणभावग्रह इति पाठाभिप्रायेण क्वचित्कार्यकारणभाव इत्ये
व पाठस्तत्रानुसंधेय इत्यस्याभिप्रायमाह नन्वेवं ग्राह्य इत्यर्थः पाठद्वयेपि तदधीन
त्वादित्यस्य कार्यकारणभावग्रहाधीनत्वादित्यर्थः एतादृशतर्कोऽप्रयोजकतया
कार्यकारणभावग्रहस्यापाद्यव्यतिरेकनिर्णयमुद्रया एतादृशतर्कसंपादकत
या। एवं च मूले तथाहीत्यस्य विपक्षबाधकतर्कोत्थापककार्यकारणभावग्र
हजनकं तर्कं जानीहीत्यर्थ इति ध्येयं। अथ कार्यकारणभावस्य व्याप्तिघटित
त्वेन तद्विपक्षबाधकस्यैव व्याप्तिनिश्चायकतया तदधीनत्वादित्यसंगतमिति चेन्न धूम
विशेषपक्षकतर्कग्राह्यविशेषकार्यकारणभावस्य विशेषव्याप्तिघटितत्वे
न सामान्यव्याप्त्यघटितत्वेन सामान्यव्याप्तिबुद्धेर्धूमोऽयं वह्निव्यभिचारी
स्यादिति तर्कोत्थापकतया विशेषकार्यकारणभावग्रहाधीनत्वसंभवात्। इत्थं

भवा०नं०टी
८
8

चक्रीधितौ कार्यकारणभावग्रह इत्यस्य विशेष इत्यादिः । ननु तथापि विशेषकार्यकारण
भावग्रहाधीनत्वसंभवात् । इत्थं दीधितौ कार्यकारणभावग्रह इत्यस्य विशेष इत्या
दिः । ननु तथापि विशेषकार्यकारणभावग्रह इत्यादि सामान्यत एवं न परिच्छिन्न
न्नीत्यंत वक्ष्यमाणग्रंथानुसारेण विशेषकार्यकारणभावग्रहस्यैव सामान्यका
र्यकारणभावविषयकत्वेन तस्य च सामान्यव्याप्तिघटितत्वयोक्तरूपत्वात्तदधीनत्वा
दिस्य संगतमित्याशयेन दीधितौ प्रकृतोपयोगित्वप्रदर्शनाय सामानाधिकरण्ये
नेत्यादिकत्यांतरानुसरणमित्याशयेनाह अवश्येति । वक्ष्यमाणग्रंथानुसारेणे राम
त्यादिः सामानाधिकरण्यव्याप्त्या कार्यकारणभावघटकदैशिकसंबंधे ८
न कार्ये इत्यादि सामान्येत्यादिव्याप्तीति सामान्यव्याप्तीत्यर्थः ग्राहकत्वं विषयक
त्वं दर्शयतीति प्रकृतोपयोगायेत्यादिः व्याप्तिग्रहेति विशेषव्याप्तिग्रहेत्यर्थः । व्य
भिचारेति विशेषव्यभिचारेत्यर्थः आदर्शितमिति तत्त्वेन तत्त्वरूपान्वयग्रहे सा

सहचारज्ञानमादर्शितं तद्व्यतिरेकसत्त्वे तद्व्यतिरेकसत्त्वरूपव्यतिरेकग्रहेण च विशेषव्यभिचार
ज्ञानाभाव आदर्शित इति भावः सामानाधिकरण्येनेवेति इदं च तादृशान्वयव्यतिरेकग्र
होपयोगरहस्यार्थे ऽनिषिद्धो हेतुहेतुमद्भावं विशेषकार्यकारणभावं आख्यायां कार्यकारणभा
वेति सामान्यकार्यकारणभावेत्यर्थः व्याप्तिविषयकत्वात् दैशिकसामान्यव्याप्तिविषयकत्वा
त्। एवं च मूलेन तथा हीत्यस्य विपक्षबाधकतर्कमेव जानीहीत्यर्थ इति ध्येयं कायेति निरू
ढत्वादिः सामग्रीवलात् उपदर्शितविशेषव्याप्तिग्राहकसामग्रीवलात् आपाततो विषयक
त्वे विशेषव्याप्तिविषयकत्वे ऽपि। तस्य निरूढकार्यकारणभावग्रहस्य व्याप्तिग्रहानुपयोगि
त्वात्। दैशिकसामान्यव्याप्त्यविषयकत्वया निरूढविशेषव्याप्तिग्राहकसामग्रीसत्त्वे ऽपि
दैशिकसामान्यव्यभिचारशंकायाः प्रतिबंधकायाः सत्त्वेन निरूढकार्यकारणभा
वग्रहस्य दैशिकसामान्यव्याप्तिविषयकत्वासंभवादित्याशयः तदुपपादकेति। निरूढ
कार्यकारणभावग्राहकेत्यर्थः प्रकृतानुपयोगित्वमेवानुपपत्तिस्तूपयोगि दैशिकसा

मान्यव्याप्तिग्रहाप्रयोजकत्वमेव तादृशव्याप्तिग्रहप्रयोजकत्वं एवार्थान्तरपरिहारसंभवादिति
भावः यथाश्रुते तर्कस्य स्वातंत्र्येण व्याप्तिग्रहानुयोगित्वेपि कार्यकारणभावग्रहस्य व्या
प्तिविषयकत्वेवत्तदुपपादकतर्कस्य प्रकृतोपयोगित्वसंभवेनासंगत्यापत्तेः तदवच्छेदेने
ति धूमत्वावच्छेदेनेत्यर्थः सामग्रीति तर्कघटितविशेषकार्यकारणभावग्राहकसामग्री
त्यर्थः वक्ष्यमाणरीत्या स्वसामग्रीबलाज्जायमानस्य विशेषकार्यकारणभावग्रहस्यैव
सामान्यकार्यकारणभावविषयकत्वाद्विशेषकार्यकारणभावग्राहकसामग्र्या धूम
त्वावच्छेदेन वह्निजन्यत्वग्राहकसामग्रीत्वादिति भावः व्यक्तीभविष्यति चेदमग्रे सामा
न्यव्यभिचारशंकायां धूमसामान्ये वैशिकवह्निव्यभिचारशंकायां तादृशसामग्रीविरहा
दिति तर्कघटितविशेषकार्यकारणभावग्राहकसामग्रीविरहादित्यर्थः अनुत्तेजकत्वे
त्तेजकत्वासंभवे सामान्ये तिरैशिकेत्यादिः व्याप्तिधीतिरैशिकसामान्यव्याप्तिज्ञानेत्यर्थः
उपयोगसंभवात् रैशिकसामान्यव्याप्तिज्ञाने उपयोगसंभवात् कारणताघटकेति अत्र

यथासिद्धनियतपूर्वकालवृत्तित्वस्यकारणतारूपतयाअथवाहितपूर्वकालत्वसंबंधेन
कार्यवत्त्विष्ठाभावप्रतियोगितानवच्छेदकधर्मावच्छिन्नसामानाधिकरण्यादिरूपकालि
कव्याप्तेर्दैशिकसामानाधिकरण्यमात्रस्यकारणताघटकत्वादितिभावः व्याप्तिज्ञा
नरवेति प्रतिबंधकत्वे इत्यनेनान्वयः सामान्येति कालिकेत्यादिः तादृशेति तदवच्छे
दनवह्निजन्यत्वग्राहकसामग्रीविशिष्टेत्यर्थः दैशिकव्याप्तेर्दैशिकसामान्यव्याप्ति
ज्ञाने दैशिकसामान्यव्यभिचारशंकायाः प्रतिबंधकतायां नतदुत्तेजकत्वमितितया
चनोक्तरीत्याप्रकृतोपयोगित्वमितिभावः तादृशेति सामानाधिकरण्येनेत्यर्थः असंभ
वेनेति सामानाधिकरण्येन धूमत्वावच्छेदेन वह्निजन्यत्ववत्रासभादेरपिनिरुक्तका
लिकव्याप्तिदैशिकसामानाधिकरण्यमात्रोभयत्वेन सामानाधिकरण्येन धूमत्वा
यच्छेदेन रासभादिजन्यत्ववारणाय सामानाधिकरण्येन कारणतायां तादृशदैशिक
व्याप्तेर्घटकत्वंस्यावश्यकत्वादितिभावः तत्रापि दैशिकव्याप्तिज्ञानप्रतिबंधकदैशिसामा क१

न्यव्यभिचारशंकाप्रतिबंधकतायामपि तस्य तादृशलाघवज्ञानस्य उक्ते अकत्वेतिं तथा च
निरूपककार्यकारणभावग्रहस्यानुमित्युपयोगिदैशिकसामान्यव्याप्तिविषयकत्वसं
भवेन तदुपपादकतर्कस्य प्रकृतोपयोगित्वं निराबाधमेवेतिभावः ननु कालिकव्याप्ते
दैशिकव्याप्तेश्च स्वातंत्र्येण कारणताघटकत्व एवानुमित्युपयोगिव्याप्तेः कारणताघट
कत्वसंभवेनोक्तरीत्या तर्कस्य प्रकृतोपयोगित्वं संभवतित्येव किंतु कार्यो व्यवहितपूर्व
स्यपरूपघटितेन कार्याधिकरणवृत्तियः कारणतावच्छेदकसंबंधावच्छिन्नप्रतियोगिता
काभावस्तत्प्रतियोगितानवच्छेदकधर्मावच्छिन्नसामानाधिकरणवृत्तियः कारणता
वच्छेदकसंबंधावच्छिन्नप्रतियोगिताकाभावस्तत्प्रतियोगितानवच्छेदकधर्मावच्छिन्न राम
सामानाधिकरण्यरूपकालघटितदैशिकव्याप्तिरेव कारणताघटिकासाधनानुमित्यु १०
पयोगिनी व्याप्तिरिति कार्यकारणताघटककत्वे मानाभावइतिवाच्यं। तथा सति घटादि
कं प्रतिसमवायेनाभावघटान्यत्वस्त्वादिना पिहेतुतापत्तेः तत्र कालिकव्यापकतावच्छेदक

तायाः समवायघटितदैशिकव्यापकताया अप्रसिद्धत्वात् एवमतीतघटादेरेतत्कालेका
लिकसंबंधावच्छिन्नप्रतियोगिताकविषयत्वावच्छिन्नाभावस्याप्रामाणिकतयाऽज्ञानत्वा
घटवच्छिन्नंप्रतितादात्म्येन विषयत्वेन हेतुताप्रसंगस्यादुर्वारत्वान्नेति चेन्मैवं तादृशाध
र्मस्यान्यथासिद्धिनिरूपकतयातेनरूपेणहेतुताप्रसंगाभावात् । न चैवं रासभत्वा
देरपि अन्यथासिद्धिनिरूपकतयातेनरूपेणहेतुतापरिवारणसंभवे दैशिकव्याप्तेर
पि कारणताघटकत्वं न स्यादिति वाच्यं सकलकार्याव्यवहितपूर्ववर्तित्वावच्छिन्नवत्ताक
धर्मस्यैवान्यथासिद्धनिरूपकत्वरूपेण वारणीयतायाः सिद्धान्तसिद्धत्वात् अन्यथा
तन्मात्रस्यैवसम्यक्त्वेऽपरांशस्य वैयर्थ्यापत्तेरित्यधिकमन्यत्रानुसंधेयमिति दि
क् तदभावे तेन यत्तत्कोटिकशंकाप्रतिबंधकत्वमित्येव वक्तुमुचितमिति वाच्यं । तदभा
वज्ञानमात्रप्रतिबंधकत्वस्य वनायतदभाववत्त्वाद्युपादानात् । मात्रपदस्यावर्ज्यमाना
हीधितावन्यथेति यथाश्रुतेवन्हेरपि वह्निरूप्यत्वेनघटपृथिव्यन्यतरत्वादेरिव वन्हित्व

च्छून्यजन्यान्यतरत्वस्याप्रसिद्धिरत आह व्याख्यायां तच्छून्यमिति यथाश्रुतजन्यत्वानुरो
धादाह वह्निपदस्येति। वस्तुत इत्यादि वस्तुपमास्वीत्या वह्निजन्यत्वपर्यवसायिन एव
तर्कस्य वह्निजन्यत्वाभावशंकानिवर्त्तकत्वेन वह्निपदस्य वह्निसमवहितपरत्वासंभव
इत्यत: कृत्यांतरं आह तच्छून्यपदस्येति क्वचित्तु तच्छून्यपदस्यवेत्येव पाठ: सामग्रीप
रत्व इति एतन्नाभश्च तच्छून्यपदस्य सहकारितासंबंधेन वह्निशून्याकर्षंतयेति ध्ये
यं। एवं च वह्निपदं यथाश्रुतमेव। यत्तु उद्देश्यसिद्ध्यर्थं वह्निपदस्य वह्निपदस्य वह्निसम
वहितपरत्वावश्यकत्वे तच्छून्यपदस्य वह्न्यघटितसामग्रीपरत्वं न साधीय इति ता 
र्किकचक्रवर्त्तिभिरुक्तं। तच्चिंत्यं वह्निजन्यत्वाभावशंकानुरोधेन वह्निजन्यत्वसिद्धेरे 
वोद्देश्यत्वात्। यथाश्रुतमेव यथाश्रुतजन्यत्वमेव पाप्यिकेति वह्नितच्छून्यान्यत
रत्वेन जनकताया अप्रसिद्ध्या तादृशान्यतरनिष्ठजनकतानिरूपितजन्यताविर
हस्य तेन वह्नित्वावच्छिन्नजनकतानिरूपितजन्यताया: याप्यिकत्वापिरपि न संभवती

स्याशयः हेयइत्तिअत्रवदंतिवह्नित्वरूपजन्यान्यतरत्वेनस्यादितिपाठेपितादृशान्यतर
त्वाभावस्यापादकतयापाद्याभावेनापादकाभावसाधनेतादृशान्यतरत्वसिद्धि
रेवनतुवह्निजन्यत्वसिद्धिरितिवह्निजन्यत्वकोटिकपाक्षिकत्वाप्यभावस्यतुल्य
तयाकथमयमेवपाठेहियः नत्वघटपटान्यतरत्वस्यघटत्वपटत्वोभयरूपत्ववत्ता
दृशान्यतरत्वस्यवह्निजन्यत्ववह्नित्वरूपजन्यतोभयरूपतयावह्निजन्यत्वकोटिक
पाक्षिकप्राप्तिःसंभवतीतिवाच्यं।तथासत्येतत्पाठेपिवह्नित्वरूपान्यतरत्वस्यव
ह्नित्वादिरूपतयातद्वच्छिन्ननिरूपितजन्यत्वासिद्धौपाक्षिकावह्निजन्यत्वावच्छिन्ननि
रूपितजन्यत्वसिद्धिःपाकपृथ्वेतत्पाठेसिद्धेर्विशिष्टहत्वात्।नचवह्नित्वाद्यननुगत
रूपस्यतादृशान्यतरत्वस्यतादृशान्यतरत्वत्वेनैवनिवेश्यत्वेनवह्नित्वांशेऽप्यप्रका
रकवह्नित्वानसंभवतीतिवाच्यं।तादृशान्यतरत्वेनस्यादितिपाठेप्यन्यतरत्वस्याननु
गतवह्निजन्यत्वादिरूपस्यान्यतरत्वत्वेनैवनिवेशनीयतयातादृशवह्निजन्यत्वसि

भवानं·टी०
१२ द्धेः पाक्षिकप्राप्त्यभावस्य तुल्यत्वात् । यदपि च विपर्ययेतत्कोटिमात्रपर्यवसायिन इत्यत्र
12 मात्रपदस्य तद्भिन्नाविषयकत्वे सति तद्विषयकत्वरूपयथाश्रुतार्थस्य व्यावृत्तिप्र
दर्शकोयं ग्रन्थ इति विभाव्यते तन्न । तत्पाठेपि तुल्यं एतेनैतत्पाठे तादृशान्यतरजन्य
त्वस्य स्वसमनियतजन्यत्वापेक्षया गुरुत्वेनाभावप्रतियोगितावच्छेदकतया यादृकी
भूततादृशान्यतरजन्यत्वावच्छिन्नभेदाप्रसिद्धिरित्यपि निरस्तं । तादृशपाठेपि तादृशा
न्यतरत्वस्योक्तरीत्या प्रतियोगितानवच्छेदकत्वेनापादकीभूततादृशान्यतरत्वावच्छि
न्नभेदाप्रसिद्धेस्तुल्यत्वात् । गुरोरवच्छेदकत्वांगीकारेण समाधानमप्युभयत्र तुल्य
मिति । अत्रोच्यते । वह्नितद्धूम्यजन्यान्यतरत्वं हि वह्निजन्यत्ववह्न्यघटितसामग्री राम
जन्यत्वोभयरूपं तत्र वह्निजन्यत्वं वह्नित्वावच्छिन्नजनकतानिरूपितजन्यत्वमि १२
ति तादृशपाठे वह्नित्वावच्छिन्नजनकतानिरूपितजन्यत्वस्य पाक्षिकव्याप्तिः संभवति
वह्नितद्धूम्यान्यतरत्वं हि वह्निधूम्यत्वोभयरूपं तत्र वह्निधूम्यत्वेनाजनकतया ताद

शोर्मध्यरूपान्यतरत्वावच्छिन्नजनकत्वाप्रसिद्धात्तादृशान्यतरनिष्ठजनकतानिरूपित
जन्यत्वस्यैव निवेशनीयत्वयाएतत्पाठेवह्नित्वावच्छिन्नजनकतानिरूपितजन्यत्व
स्यपर्याप्तिकप्राप्तिरपिनसंभवतीतिरूस्यदृशावधारणत्वंनतुतादृशान्यतरत्वंनव
ह्नि जन्यत्वादिनानाव्यक्तिरूपंगौरवात्किंत्वतिरिक्तास्खंडोपाधिरूपमितितादृशपर्या
प्तिनवह्नि जन्यत्वस्यपर्याप्तिकोप्राप्तिः किंचगुरुधर्मस्यप्रतियोगितानवच्छेदकत्वंसिद्धां
तसिद्धमितिगुरोर्जन्यत्वसमनियतत्तादृशान्यतरत्वस्यप्रतियोगितानवच्छेदकत
यातदवच्छिन्नभेदरूपापादकाप्रसिद्धिरतआहतीधितावाहीतिआदिनावह्निजन्य
त्ववह्निभिन्नजन्यत्वान्यतराभाववान्स्यात्जन्योनस्यादित्यस्यसंग्रहः पत्त
त्रापि जन्यत्वत्वरूपलघुसमनियतस्यगुरोस्तादृशान्यतरत्वस्यानवच्छेदकत्वेन
तदवच्छिन्नाभावाप्रसिद्ध्यासहघटितापादकाप्रसिद्धिरितितन्नप्रागभावप्रतियोगित्व
त्वादिरूपजन्यत्वत्वस्यतादृशान्यतरत्वासमनियतत्वात्नियमादिघटितजन्यतात्वस्य

वानन्तुगतत्वात्। आरव्यायां तत्कोटिमात्रे तिविपर्यय इत्यादिः दीधितौ क्वचिदिति यदि
घटः स्यात्तदा द्रव्यं स्यादित्यापादावित्यर्थः आपाद्येति प्रयोज्यत्वं तृतीयार्थः पर्यवसानमा
न्वयि यी क्वचिदिति यदि सुरभिगंधातिरिक्त गंधाभाववान् यं निर्गंधः स्यात्तदा पृथिवी
न स्यादित्यापादावित्यर्थः गंधाभावाभावत्वावच्छिन्न निरूपितव्याप्त्या इतरबाधबलात् सु
रभिगंधत्वावच्छिन्नसिद्धेरिति भावः आरव्यायां बाधबलादिति। इतरबाधादिसह
कृतपरामर्शस्य व्यापकतानवच्छेदकरूपेणापि साध्यानुमितिजनकत्वादिति हृद
यं प्रकृते पीतरबाधबलादेव वह्निसमवायित्तजन्यत्वासिद्धिरित्याशयेनाह दीधितौ
तत्संपन्नय इतिय दुपः पञ्चोपि नन्वेतावतैव कृष्यं विपर्ययेतत्कोटिमात्र पर्यवसानमय 
त आह। विशेषणवत्वेनेति। उपस्थितेनेति विशेषणाभावमादाय पर्यवसा
नं स्फुचितं विशेषेति। विशिष्टाभावस्य विशेष्य विशेषणाभावानतिरिक्तत्वादिति भावः
अत्र केचित्तु यत्र तर्के दै वा दा पाद्याभावेनापादकाभावानुमितिर्न जाता तत्तर्कस्य विष

र्यानुमित्यनुपधायकत्वशंकानिवर्तकत्वासंभव इति तत्कोटिमात्रविपर्ययानुमिति
योग्यत्वमेव तद्विपर्ययपर्यवसायित्वं वाच्यं तथा च वह्नेतरबाधस्य कालेपि तादृशा
योग्यताया स्सत्वेन नेतरबाधसंपादकं पक्षे वन्ह्यसमवहितत्वादि विशेषणमनु
पादेयमेवेति वदंति तच्चिंत्यं सामान्यतोव्याप्यस्य विशेषपर्यवसानयोग्यताया अपि
इतरबाधाधीनत्वेन तत्संपादकविशेषणोपादानस्यावश्यकत्वात् । एवं च पक्षमि
श्रयविशेषधीशंकानिरसनपरमेवावन्हेरित्यादिमूलमित्याहुस्तथोपास्थितीति अ
त्रेवन्हेरित्यादिमूलेऽप्यनुपपत्त्यापि विशिष्टाभावस्य गतिरिक्त्वे व्यापकतावच्छेदक
विशिष्टाभावत्वाक्रांतं विशेष्याभावमादाय कथं विपर्ययपर्यवसानमिति चे
न्न वन्हित्वादिनागुंजादिरनुमितेरनुभवसिद्धत्वं यावत्प्रतीत्य पर्यवसाने व्या
पकतावच्छेदकानाक्रांतविधेयकानुमितेरभ्युपगमस्यावश्यकत्वात् प्रकृतेपि वि
शेष्याभावं विनाप्रतीतेरपर्यवसानेन व्यापकतावच्छेदकतानाक्रांततद्विधेयका

भवानं·टी
१४
14

नुमितिसंभवेनपत्रविषयंपपर्यवसानेबाधकाभावात्। अतएवभ्रमत्वव्यापकाभाव
वत्तायपरामर्शान्नद्धत्तितत्प्रकारकत्वानुमितिः अन्यथाप्रतीतेरपर्यवसानादित्या
दिकंमत्सिकारादिसंमतंसंगच्छतइतिदिक् वन्ह्यजन्यमपि नांतरीयवृन्हिकमिति
शेषंग्रंथः तथाचवन्हिअजन्यत्ववन्हिसमवहितजन्यत्वयोर्भेदेनपूर्वकल्पेवन्हिसम
वहितजन्यत्वसिद्धावपिनवन्हिजन्यत्वपर्यवसानासंभवेनप्रकृतोपयोगित्वं
नसंभवतीतिभावः। आख्यायांनवन्हिजन्यत्वेति। नवन्हिजन्यत्वावच्छिन्नेत्यर्थः। तस्स
हकारित्वं। तस्यतर्कस्यसहकारित्वंतद्रूपेणवन्हिजन्यत्वत्वेनतत्पार्थ्योपावच्छिन्न
प्रतियोगिताकत्वंतदभावस्य। वन्हिजन्यत्वाभावस्यअनापादकत्वादितिअयमाश राम
यः तद्धर्मावच्छिन्नाभावाभावस्यतद्धर्मावच्छिन्नरूपतयावन्हिजन्यत्वत्वावच्छिन्नाभा १४
वस्यापादकत्वेआपाद्याभावेनापादकाभावसिद्धौनवन्हिजन्यत्वसिद्धिरन
तिरिक्तत्वेपिविशिष्टाभावत्वेनतत्सिद्धावपिनवन्हिजन्यत्वत्वावच्छिन्नसिद्धिर्व्यापक

तानवच्छेदकरूपेणानुमितौ साध्याभानस्य प्राचीनसंमतत्वादिति तस्य तद्विशिष्टवह्नि
समवहितजन्यत्वस्य वह्निजन्यत्वरूपत्वासंभवादाह । तन्नियतत्वे वेति वह्निजन
न्यत्वात्मकत्वे इति शेषः । व्यावर्त्तकधर्मदर्शनविधया किंचित्संपादकतयापि व
ह्निजन्यताभावाभावव्याप्यवत्त्वाज्ञानसंपादकतयेति यावत् विशेषणवत्त्वेन
निर्णीते विशिष्टाभावस्य विशेष्याभावनैयत्यादिति भावः । तत्र वह्निसमवहित
जन्यत्वस्य वह्निजन्यत्वात्मकत्वं मास्तु तयोरर्थे इतरबाधसहकृतात् द्वित्वे
व्यापकतावच्छेदकत्वग्रहान्महानसीयवह्नित्वेनेव तत्सहकृतात् विशिष्टाभाववत्त्वे
न ऊहात् वह्निजन्यत्वत्वविशिष्टविशिष्टाभाववत्त्वेनानुमितौ साध्यभानं संभव
तीति तत्प्रतिषेध इति वदन्ति । तद्धि विशिष्टस्य तद्व्याप्यत्वमपि प्रतिषेधतीति ए
तेनात्र वन्ह्यजन्यमपि वह्निसमवहितजन्यं संभवतीत्येव पाठः वन्ह्यसमवहिता
जन्यत्वाभिधानस्य व्यर्थत्वादिति परास्तं । तत्प्रतिषेधार्थकत्वात् । तत्स्वरूपमिति

॥ तथा च वह्निसमवहितजन्यत्वमित्यत्र वह्निसमवहितत्वेन वह्नेरेवोपादानं वह्नेर्वि
शेष्यान्वयिनान्वयित्वरूपविशेषणत्वेनातात्पर्यमिति भावः तावन्मात्रस्य सति
सप्तम्यर्थत्वेन लाभादिति भावः। एवं च दी
धितावपि वह्निजन्यत्वपर्यवसितमित्यस्योक्तएवार्थः वह्निसमवहितजन्यत्व
मिति स्वरूपपरं तेन न तत्पदलाभ इति ध्येयं। अथैतत्तर्कस्य वह्निसमवहितसाध्य
कस्थलीयत्वाभ्युपगमेन वह्निसमवहितजन्यत्वस्य वह्निजन्यत्वापर्यवसाने
ऽपि न दोष इति चेन्न वह्निसाध्यकप्रसिद्धानुमानत्यागे बीजाभावात्। तन्न्यायपा
दकेकोटावनुयोगिनि वह्निजन्यत्वाभाववन्न समवहितजन्यत्वादिरोषणादाने
नैव धूमादेर्व्यभिचारवारणसंभवे दीधितिकारस्य तथाचेत्यादिना पादककोटि
स्य तादृशविशेषणस्योपाधीभूतजन्यत्वाभावप्रतियोगिकोटौ निवेशे बीजाभाव
इत्यत्तस्तात्पर्यमवतारयति नान्वित्यादिना। निरूपितत्वमेतत्तत्फलत्वमेवव्य 

स्यादित्यत्र भवतीति हेतोरन्वेतावता प्रकृते किमायातम् अत्राव्याप्यधीभूतजन्यत्वाभाव
ज्ञानरूपानिष्टसाधनत्वयावद्वह्निः जन्यत्वाभावज्ञाने द्वेषस्ततो द्वेषवशात्तद्वह्निजन्य
त्वाभावज्ञाने इच्छा न जायते तस्मात्तत्रेच्छाया अभावात् तादात्म्यतत्संशयाभाव इति प्र
सक्तत्वात्तर्कस्याहार्यवह्निजन्यत्वाभावशंकाप्रतिबंधकरूपफलत्वसंपादकत्वसंभवा
दत आह। तदुपयेति। इत्यभिप्रेत्येति। तथा च नोक्तरीत्या तर्कस्य फलसंपादकत्वमि
ति भावः। इदमुपलक्षणं आपादककोटौ विशेषणदाने उक्तरीत्या पक्षेऽपि तद्विरो
धस्याहानेर्गौरवमित्यपि द्रष्टव्यं। यथाश्रुतस्येति जन्यत्वस्येति शेषः। विवक्षणीय
पक्षस्य विवक्षणीयात्मक जन्यत्वस्य। तां। व्यावृत्तिं संबंधेनेति। तृतीयार्थोऽभेदः। प्र
त्यासत्त्यैकदेशप्रत्यासत्त्यन्वयी। स्वप्रत्यासत्त्यस्वाजनक इति स्वप्रत्यासत्त्ये स्वाजन
क इत्यर्थः। प्रथमस्वपदं वह्निपरं द्वितीयस्वपदं पक्षे इति पक्षपदार्थपरं। घटसंयोगा
द्वेघटे धनसंयोगाद्वे भवन्ति तितादृशसंबंधस्संयोगस्तेन वह्निप्रत्यासन्नं वह्निसं

भवानंदी-टी०
१६
16

युक्तेंधनं तत्र घटेंधनसंयोगाजनको वह्निरिति घटेंधनसंयोगादेर्नांतरीयकवह्निकत्वमिति
भावः। एतेन निरुक्तनांतरीयकवह्निर्यत्रेति कुत्स्यापवह्नेर्जन्यत्वे सति वह्निनियतोत्पत्ति
कत्वं नांतरीयकवह्निकत्वं प्रसिद्धेति न धूमरूपादिसाधारणेन जन्यत्वस्य पर्याप्तार्थ
कत्वे वह्न्यसंयुक्तसामग्र्यजन्यत्वरूपपर्याप्तार्थकत्वे वह्न्यसमवहितेनाजन्यत्वस्य धूम
रूपादिभावग्रस्य विशेषणस्य सत्वप्रदर्शनं न संभवति निरुक्तनांतरीयकवह्निकत्वेन
तु वह्न्यजन्यत्वे सति वह्निसंयुक्तजन्यत्वपर्यवसितेन धूमरूपादिसाधारणेन तादृशविशे
षणस्य सत्वप्रदर्शनं संभवति एतावता दीधितिस्थनांतरीयकवह्निकपदस्य प्रसिद्धार्थ
मुपेक्ष्य व्याख्यांतरमाने वीजमुक्तं। तथा च निरुक्तनांतरीयकवह्निकभिन्ने धूमरूपादौ राम
सत्वं ताभावेन व्यभिचारासंभवात् व्याख्यांतरमिति सूचितं इत्यर्थ इति एतदु १६
त्तरं न वित्स्यादिपाठः। यावत्कारणे इति वह्नितत्समवधानेतरेत्यादिः क्वचित्तादृश
यावत्कारणे इति पाठस्तत्र तादृशेत्यस्य वह्नितत्समवधानेतरेत्यर्थः विधेयत्वात्। विधेय

तथात्वाभावान्न दोषः। नान्तरीयकवह्निके व्यभिचारः स्वीयत्वादृशया यावत्कारणान्तर्गततत्तदीय
चरमकारणे वह्न्यसमवधानकालीनत्वाभावादिति भावः। तेनेत्यादिनावष्टम्भमाणानुशया
हार। अत्र चेति। तद्वह्निसमवधानेति। पक्षीकृतधूमो येन वह्निना जन्यते स एव तद्वह्निस्त
त्समवधानं च तेन तद्धूमजननेऽव्यवधानं धनसंयोगादिः। अक्रमेत इत्यर्थ। क्वचित्तु न दोष इ
त्यनन्तरमत्र वह्न्यसमवधाने त्यादिर्वह्निसमवधानमित्यन्तः पाठः। तत्र तत्त्वावच्छिन्नप्राग
भाव एवेति पाठः। तत्र धूमेऽपि न संभवतीति तत्र वह्नितत्समवधानयोरपि धूमीयत्वावत्का
रणान्तःपातितया तयोर्वह्न्यसमवधानकालीनत्वाभावादिति भावः। अप्रसिद्धिः धूमे अ
संभवः। उभयमेतीति वह्नितत्समवधानोभयेत्यर्थः। वह्निसंयुक्त अन्येति वह्निसंयुक्ते धनजन्ये
त्यर्थः। घटसंयोगे। घटे धनसंयोगेन तु अन्यत्वस्य वह्न्यसमवधानेत्यादिरूपत्वे यत्कत्व
मारणीत्यासंत्यंतस्य तद्वह्निसमवधानप्रागभावकालावच्छिन्नाजन्यत्वाव्यक्ततमा
तस्य धूमकारणत्वे सत्त्वाद्व्यभिचार इत्यत आह नान्तरीयकवह्निकस्यैवेति प्रसिद्धसो

त्वादित्युपादेन निरूक्तनांतरीयकवन्हिकत्वमवछेदः न व्यभिचार इति तथा च जन्यत्वस्योक्तरू
पत्वे धूमरूपाद्यावपि विशेष्यदलेनैव व्यभिचारी वारणीय इति भावः तत्रैव तादृशधूम
रूप एव । यावदिति तथा च यावत्कारणांतर्गतधूमादेर्वन्ह्यसमवधानकालीनत्वाभा
वान्न व्यभिचार इति भावः तत्वेतितद्वन्हिसमवधानत्वेस्यर्थः तद्धर्मेति तद्धर्मावच्छिन्नस्य या
वतः प्रागभाव इत्यर्थः इदं च प्रागभावस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वानभ्यु
पगमे तदभ्युपगमे त्वाह तद्धर्मावच्छिन्नप्रतियोगिताकेति । अन्यथैतदिति उभयथापि त
स्यापीत्यादिना वक्ष्यमाणस्य पत्तिं किंचित् । तद्वन्हिसमवधानप्रागभावकालीनत्वमादाय
व्यभिचारस्य वारणासंभवादिति भावः तेनेति तद्वन्हित्वेन वन्हिनिवेशेन यावदिति । तादृशेत्या रा म
दिः एवमग्रेपि । नाप्रसिद्धिः न प्रतियोग्यप्रसिद्धिः ध्वंसमुपेक्ष्य प्रागभाव इति निवेशो बीजमा १७
ह । नवेति ध्वंसेति । न च तादृशयावदंतर्गतगतस्य तत्तद्धूमरूपप्रागभावस्याप्रसिद्ध्यात
त्कथं व्यभिचार इति वाच्यं ध्वंसनिवेशे तद्धूमप्रागभावमादायाप्रसिद्धिवारणायता

दशायावत्कारस्याभावत्वस्य निवेशनीयतया व्यभिचारसंभव इत्याशयात् । अत्यंताभावो
येत्यादी अस्मात् अत्यंताभावेति वह्निसमवधानस्य तद्वह्निसमवधानस्याव्यभि
चार इति । धूमरूप इत्यादि । पूर्वोक्तप्रसिद्धभावव्यभिचाराभावोऽस्फुट इत्यत एतद्वह्नी
त्यादि नाञां तृतीयकेति तद्वह्नीत्यादिः नां तृतीयकत्वं चात्र तदन्यत्वे सति तदुभयोत्पत्तिद्वि
तीयक्षणस्थेनियमेन अन्यत्वं । क्वचित्पुस्तके अत्यंताभावेत्यादिर्न दोष इत्यन्तः पाठोऽपि ना
स्त्येव । ध्वंसप्रागभावसाधारणकादाचित्काभावत्वेन निवेशोऽपेक्ष्यादी अस्माह यत्र
वार्धेधन इति क्वचित्तत एव यत्र ध्वंसेधन इति पाठस्तत्रात एवेत्यस्य कादाचित्काभावत्वेन निवेश
मुपेक्ष्य प्रागभावत्वेन निवेशोऽपेत्यर्थः । क्रियापूर्वसंयोगनाशादेरिति यथासंख्ये
न प्रागभावध्वंसयोरन्वयः । आदिपदोपगृहीतघटादेस्तूभयत्राप्यन्वयः । यद्यपि
पूर्वोक्तनञ्जमरूपात्वे व्यभिचारसंभवेऽस्य लाभांतराऽननुसरणं प्रसंजत्यं तथापि सम
नंतरमेव तद्वह्निसमवधानत्वावच्छिन्नप्रागभावपर्यंतानुधावन व्यावृत्तिप्रदर्शनायास्य

त्वांतरानुसरणस्यावश्यकतयातस्या । पीत्यादिवक्ष्यमाणस्वल्पशब्देनैवनिर्वाहइत्याशये
नप्रथममतस्तदनुसरणं तद्वन्हिसमवधानत्वाश्रयत्वमुपेक्ष्यतदवच्छिन्नत्वनिवेशोबीजमा
ह तस्यापीति पूर्वसंयोगनाशस्यापीत्यर्थः वन्हिसमवधानेतितद्वन्हिसमवधानेत्यर्थः
तद्वन्हिसमवधानत्वावच्छिन्नप्रागभावेतिरतन्नत्वंव्याख्यात्रैवसचेत्यादिनापूर्वमि
वोक्तं तद्वन्हीत्यादि अत्रकालीनांतोत्पन्नांतयोः कर्मधारयः कालीनांतंव्यभिचारसंपा
दनाय । उत्पन्नांतंयथाश्रुतवन्हिसमवहितजन्यत्वरूपसत्वंतरह्यणायतथासत्ये
वव्यभिचारसंगतेः सत्यंतार्थकृत्वादित्तिसत्यंतेपिवृत्तेस्तद्वन्हित्वेननिवेशादितिभा
वः यथाश्रुतेवक्ष्यमाणदोषाहात् । तद्वन्हिसमवधानेति । कालावच्छिन्नाजन्यत्वमि राम
तितादृशकालावच्छिन्ननियतपूर्वकालवृत्तिताकजन्यत्वाभावइत्यर्थः । यत्रिकृपिनि १८
नियतपूर्वकालवृत्तितायांतादृशकालावच्छिन्ननियतपूर्वकालवृत्तिताकजन्यत्वा
भावइत्यर्थः । त्वाभावइतियावत् । तथाचतद्वन्हिसमवधानरूपणाव्यवहितोत्तरत्वरेण

स्वनिकृत्वाभावरूपं तद्वह्निसमवहितान्यत्वमिति पर्यवसितं अत्रापि तद्वह्निसमवधानं त
द्वह्निसमवधानत्वावच्छिन्नप्रागभावएवन चैतावत्पर्यंतनिवेशे प्रयोजनाभाव इति
वाच्यं तथासति एकेन वह्निना धूमद्वयस्य कालभेदेन जनने प्राथमिकधूमस्य
भावितद्वह्निसमवधानप्रागभावकालत्वावच्छिन्नजन्यत्वेन तत्र सत्यंतासंभवापत्तेः
तेनेति सत्यं तस्य वह्निसमवहितभिन्नाजन्यत्वरूपं यथाश्रुतार्थं परित्यज्योपदर्शिता
र्थकरणे नेत्यर्थः तादृशसमवधानप्रागभावेति निरुक्ततद्वह्निसमवधानत्वावच्छि
न्नप्रागभावेत्यर्थः एवमग्रेपि संभवाद्विति नियतपूर्ववृत्तित्वादन्यथासिद्धत्वा
द्वेत्यभिमानः विशिष्टेति इदं च सत्यंतविशेषणस्य विशेष्यदलस्य च खंडशः प्रसि
द्धिः संभवतीति सूचनाय आर्द्रेंधनजन्यवह्नेरेवेति सत्यप्यार्द्रेंधने वह्नौ चतादृश
प्रतिबंधकमण्यादिसमवधाने धूमानुत्पन्नेरिति भावः यत्वार्द्रेंधनजन्यवह्नेरे
वेति सत्यप्यार्द्रेंधने वह्नौ तादृशप्रतिबंधकमण्यादिसमवधाने धूमानुत्पन्नेरिति

१९ भावः यत्त्वार्द्रेन्धनजन्यवह्नेर्न धूमहेतुः विनाप्यार्द्रेन्धनजन्यवह्निं शुष्केन्धनायोगोलकादि-
जन्यवह्निभ्यां जलसत्कारेण धूमोत्पत्तिदर्शनात् जन्यत्वरूपाया आर्द्रेन्धनाया वह्निज-
नकत्वे मानाभावाच्च। किन्तु तादात्म्यसंबंधेनेन्धनं संयोगसंबंधेन जलमुत्पत्तिसंबंधेन
वह्निश्चेत्यादिकमेव धूमहेतुरिति तच्चिन्त्यं तावतापि धूमोत्पत्त्यधिकरणेन्धनेयोगोलका-
दिजन्यवह्नेरुत्पत्तिसंबंधेनासत्त्वेनार्द्रेन्धनजन्यवह्नेर्हेतुत्व एव पर्यवसानात् आर्द्रेन्धनाया-
योगोलकादिजन्यवह्निजातीयवह्निहेतुतायाः अन्वयव्यतिरेकसिद्धत्वाच्च धूमं प्रत्या-
र्द्रेन्धनजवह्नित्वेन हेतुत्वं जलत्वेन्धनत्ववह्नित्वैर्वा एवं विजातीयवह्निं प्रत्यार्द्रेन्धनत्वेन
हेतुत्वं जलत्वेन्धनत्वाभ्यां चेत्यन्यदेतत् अधिकमुपाधिग्रन्थे वक्ष्यामः अजनकत्वादिति
अन्यथासिद्धत्वेनेत्यादिः। तादृशेति। आर्द्रेन्धनजन्येत्यर्थः एवमग्रेपि। तत्र। आर्द्रेन्धन राम १९
जन्यवह्निद्वयजन्यधूमेप्येतद्दोषेति। अप्रसिद्धीत्यर्थः प्रथमवह्नितत्समवधानेतर-
तधूमकारणयावदन्तर्गतस्य चरमवह्नेः प्रथमवह्न्यसमवधानकालीनत्वाभावा

दितिभावः एकतद्वह्निमात्रारभ्यंध्यधूमस्यैव पक्षत्वमित्याशयेनाह यत्रेति संकोचास
म्भुराह तादृशेति तद्वह्निसमवधानत्वेन तद्वह्निव्यापारत्वेन। तद्वह्निसमवधाने तदि
त्यनेनैव तद्वह्निव्यापारे तरत्वस्य निवेशनेनैव वारणं तु। तद्भूमावयवादेस्तादृ
शयावत्कारणमध्यनिवेशवारणं त्व। तथा च नाप्रसिद्धिरिति भावः यद्वा वारण
त्र अप्रसिद्धिवारणं तत्तद्भूमावयवादीनां तादृशयावत्कारणमध्यनिविष्टत्वा
भावादितिभावः तदवयवेति तद्भूमावयवावयवेत्यर्थः यत्रेति धूमद्व्यणुकादिक
मनुत्पाद्यैवेतिशेषः संयोजननद्वारा जन्यमानसंयोगद्वारा स्थूलधूमचतुरणु
कादिरूपस्थूलधूमः तादृशधूमस्यैवेति तादृशस्थूलधूमस्यैवेत्यर्थः तथा च
तद्वह्निजन्यधूमद्व्यणुकाप्रसिद्ध्या न तद्धेतुकत्वे व्यभिचार इति भावः नन्वेवमपि
तादृशधूमारम्भकत्रसरेण्वेकत्वादौ व्यभिचारो दुर्वारः तादृशयावत्कारण
स्य स्वप्रागभावधूमद्व्यणुकैकत्वादेस्तद्वह्निसमवधानकालीनत्वादत आह त

भवानं· टी
२० द्वयवत्त्वेति तादृशस्थूलधूमावयववत्त्वेत्यर्थः तद्वह्निसमवहितेति तादृशैकत्वसामग्र्या
स्तद्वह्निसमवधानकालावच्छिन्नत्वेन तत्सामग्री अन्येषु तादृशैकत्वेषु सत्यं ताभा
वान्न व्यभिचार इति भावः तादृशधूमैकत्वादेर्व्यभिचारं वारयति तादृशेति । तादृ
शेति स्थूलधूमारंभकेत्यर्थः तद्वह्निसमवधानपूर्वैस्त्रिचतुरैः संयुक्तैरिति । इदं च संबंध
प्रत्यक्षे यावदाश्रयसंनिकर्षस्य हेतुतया वक्ष्यमाणप्रत्यक्षप्रयोजकतादृशाकारणान्त
र्गतं च बहुत्रसरेणुसंयोगानां व्यभिचारसंपादकवह्निसमवधानकालीनत्वरक्षार्थे
त्रसरेणुविशेषणं । तत्र प्रत्यक्षे । स्थूलधूमोत्पत्तिकालोत्पन्नस्थूलधूमारंभक
ण्वा ८ धूमत्रसरेण्वादिसंयोगप्रत्यक्षे तादृशसंयोगस्य । स्थूलधूमारंभकत्रसरेण्वादि राम
संयोगस्य अपेक्ष्यांशुद्ध्यात्मकसंबंधितावच्छेदकप्रकारकज्ञाने ति तादृशत्रसरेणु २०
त्वादिप्रकारकज्ञानेत्यर्थः अत्र तादृशस्थूलधूमारंभकत्रसरेण्वादिसंयोगोत्प
त्तिकालोत्पन्नस्य संबंधितावच्छेदकप्रकारकज्ञानस्य तद्वह्निसमवधानकालीनत्वा

भावेन तद्वह्निसमवधानपूर्वोऽस्मिन्न तादृशक्षणे न मानमित्येव व्यभिचारो वाऽयस्तस्य वह्निव
यस्य व्याप्तितया तादृशाऽयस्पर्यवसितं तद्व्याप्तित्वाभावेन कार्यसहभावेन हेतुत्वं
न संभवतीत्यत उक्तं यद्दृव्याणुकात्मकेति। वह्न्यसमवधाने तितद्वह्न्यसमवधा
नेत्यर्थः एवमग्रेऽपि वह्न्यणुसंयोगेति वह्न्यणुत्रसरेणुसंयोगेत्यर्थः ननु तादृशधूमा
रंभकसंयोगोत्पत्तिकाले कदाचिद्वह्न्यणुसंयोगान्तरानुत्पादेऽपि संभवतीत्युक्तव्य
भिचारतादवस्थ्यं। तदुत्पादसंदेहेऽपि व्यभिचारसंदेहो दुर्वार एवेत्यत आह वस्तु
तास्त्विति। तद्वह्निसमवधानत्वेन सकलतत्तद्विशेषणगौरवेण प्रथमोपस्थिततया तत्
द्वह्निसमवधानस्यैव निवेश उचित इत्याशयेनाह तद्वह्नेरिति। न चैवं विशेष्यदले
व्याघातः तद्वह्निसमवधानप्रागभाव एव निवेश्यतां एवं च तद्वह्निसमवधानत्वाव
च्छिन्नप्रागभावपर्यवसानानिवेशेन लाघवमपीति वाच्यं। इष्टापत्तेः तदसमवहितेति
तत्प्रागभावकालीनेत्यर्थः सामग्र्यजन्यत्वस्येति सामग्र्यजं तन्नर्भावे धूमस्याव्या

५१

घटतद्वह्निसमवधानप्रागभावकालीनस्वप्रागभावजन्यत्वस्यात्तत्रसत्त्वंतासिद्धिः
स्यादितितदंतर्भावः एवं चासाधारणकारणलक्षणघटकधर्मसामग्र्याघटकभावयत्वसं
योगरूपायास्तादृशप्रागभावकालीनत्वान्नासिद्धिः प्राग्उक्तप्रत्यक्षे। व्यभिचारइ
ति। आद्यतद्वह्निसमवधानप्रागभावकालीनापेक्षाबुद्ध्यात्मकसंबंधितावच्छेदक
प्रकारकज्ञानरूपसामग्रीजन्यत्वेनसत्त्वंताभावादितिभावः अत्रेदं बोध्यं। अत्रा
द्यवह्निसमधाननिवेशनं लाघवमनुसृत्य वस्तुगतिमनुरुध्योक्तं नतु व्यभिचारवार
णार्थं तद्वह्निसमवधानत्वावच्छिन्नप्रागभावनिवेशेपि तद्वारणासंभवात् किंतु सत्त्वं
तस्यपूर्वोपदर्शितार्थकत्वेन व्यभिचारवारणं नसंभवतीति तं परित्यज्यैतादृशार्थ 
करणं। अतएवात्र तद्वह्निसमवधानप्राक्कालोत्पत्तिकघटादौ व्यभिचारवारणायो 
पात्तेन जन्यद्वयोपादानं व्यर्थं तत्र तद्वह्निसमवहितजन्यत्वाभावादेव व्यभिचारवारण
संभवादित्यपि परास्तं नञ्द्वयोपादानं विनैतादृशार्थालाभेनैतादृशव्यभिचारवा।

रणा संभवेन तस्य पर्थक्यादित्ति वस्तुतस्तु न तु तद्वन्हेरार्द्रेंधनपरमाणुष्वश्यामरूपा
दिकमुत्पाद्यत तत्संयोगजन्य धूमद्व्यणुकादिद्वारा स्थूल धूम हेतुत्वं न तु वन्ह्यंतरज
न्य धूम यत्रसरेण्वादीनामेव संयोगद्वारा तत्संयोगेन तद्वन्हेर्हेतुत्वात्। धूम द्व्यणुकप्रा
रकत्वे तु धूमद्व्यणुकसंयोगादीनामपि तद्वन्हि द्वारत्वाद्भवति स्थूल धूमे तद्वन्हे हे
तुत्वं। एवं च तद्वन्हिनाधूमद्व्यणुकादिकमुत्पाद्यैव स्थूल धूम उत्पाद्यत इति नियम
स्यावश्यकत्वात्पार्वतीयवन्ह्यंतरजन्येत्यादेरयुक्तत्वेन न चैवमपीत्यादिनापू
र्वोक्तस्तद्वन्हि जन्य धूमद्व्यणुकैकत्वेऽभिचारो दुर्वार इत्यत आह। वस्तुतस्त्विति
। प्रागुक्ते तद्वन्हि जन्य धूमद्व्यणुकैकत्वेऽभिचार इति। आद्य तद्वन्हि समवधान
प्रागभावकाले। न तत्र धूमपरमाण्वेकत्वरूपसामग्रीजन्यत्वेन सत्यं ताभावादि
त्याव्यःशेषं पूर्ववत् यत्तु तद्वन्हिजन्यधूमद्व्यणुकमेव पक्षः एवं च तद्वयवपरमा
णुरूपेण व्यभिचारः तस्य वन्हि जन्यत्वेन तत्र वन्हिजन्यत्वाभावरूपापादकस्यैवास

भवानं॰दी॰ २२ त्वात् नापि तद्धूमद्व्यणुकैकत्वे तत्समवायिकारणस्य तत्र द्व्यणुके का
र्ये तद्वह्निसमवधाने तत्स्य तद्वह्निसमवधानाकालीनत्वात्। नापि तदवयवपर
२२ माणुसंयोगग्रहणे तस्यातीन्द्रियत्वात् इत्थं च यथा स्थूलधूमे पिकार्यकारणभाव
ग्रहस्तथा दीधितिकार एवाग्रे वक्ष्यतीति तत्र। धूमद्व्यणुकस्य पक्षत्वे हुताशन
रासभादीत्यादिदीधितिग्रन्थासंगतेः स्थूलधूमपक्षतायामेव तत्संगतेः तत्सं
योगेतिलद्वह्नेस्तदिन्धनइत्यादिनोक्तसंयोगेत्यर्थः। तदार्द्रेन्धनेति। तत्संयोगाश्रयार्द्रे
न्धनेत्यर्थः तदाश्रयेन्धनेति तदिन्धनस्याधिकरणविधया। तत्क्रियानाशेतत्संयोग
नाशे च तत्तुल्यमिति सूचनायाश्रयत्वोक्तिः परं केवलं। संयोगिविशेषितस्यैवेति य राम
त्र द्रव्यसंयोगस्य कारणत्वं तत्रसंयोगेन द्रव्यस्यापि कारणत्वमिति नियमांगीका २२
रादिति भावः आपादकस्यासत्वेनैवेति। अत्र केचित्। उक्तनियमानंगीकारेपि न
क्षतिः धूमस्य वह्निधूमावयवसंयोगद्वारा समवायेन वह्निजन्यतयापावत्कारण

जन्यत्वप्रविष्टजन्यत्वस्यसमग्रयसंबंधावच्छिन्नत्वविवक्षणेननाशेतादृशजं
न्यत्वाभावेनोक्तव्यभिचारस्याबाधसत्वेनापिनिरसनसंभवादितिवदं
ति। तन्नतथापिनोदनादस्यतद्वन्हिसमवधानजन्येंधनक्रियायांवन्हिसमव
धानप्रागभावकालीनवन्हि तत्समवधानोत्तरयावत्क्रियाकारणेंधनादिनि
रूपितसमवायसंबंधावच्छिन्नजन्यत्वस्यसत्वेनतत्रव्यभिचारस्योक्तनिय
मांगीकारेएतद्रीत्याप्युद्धारकस्यासत्वेनैवनिरसनसंभवात्। अथतथापिनो
दनादस्यारंभकसंयोगजन्यतद्भूमावयवक्रियायांव्यभिचारोदुर्वारः तत्रवन्हि
तत्समवधानोत्तरयावत्कारणतादृशक्रियाप्रागभावस्यवन्ह्यसमवधान
कालीनत्वादितिचेन्न। नोदनाभिघातजन्यक्रियायांस्पर्शवेगयोरपिहेतुतया
प्रागभावस्यवन्ह्यसमवधानकालीनत्वादितिचेन्न। नोदनाभिघातजन्य
क्रियायांस्पर्शवेगयोरपिहेतुतयातादृशयावत्कारणमध्यनिविष्टयोस्तयो

भवानं.टी.

२२ र्वेत्त्वस्य समवधानकालीनत्वाभावेन व्यभिचारासंभवात्। अथैवमपि यत्रोदासीना
23 वयवेन सह तद्धूमावयवसंयोगस्तत्र उदासीनावयवमहाधूमयोः संयोगस्तत्र
व्यभिचारः तदवयवसंयोगस्य महाधूमनाशोत्तरं खंडधूमजनकत्वेन तद्वह्निसम
वधानतया तादृशयावत्कारणस्य वह्न्यसमवधानकालीनत्वादिति चेन्मैवं सं
योगजसंयोगेऽपि पूर्वसंयोगनाशस्य हेतुतया यावत्कारणांतर्गते तत्र वह्न्यसम
वधानकालीनत्वाभावेनादोषात्। केचित्तु तादृशयावत्कारणजन्यद्रव्यत्वाभा
वस्यैवाप्याद्यतया नोक्तक्रियानाशादौ व्यभिचारः। न चैवं नांतरीयकवह्निके घटे धू
मसंयोगादौ व्यभिचाराभावेन मध्यास्तु तज्जन्यत्वं विहाय वह्न्यसमवधानकाली राम
नत्वादि निष्कर्षानुसरणमफलमिति वाच्यं तादृशान्यविशेषे व्यभिचारवारणायैव २३
तादृशनिष्कर्षानुसरणस्यावश्यकत्वादित्याहुः। अथैवमपि यत्र तद्वह्नितद्धूमसं
योगोत्पत्तिकाले महापटनाशस्ततः खंडपटोत्पत्तिस्तत्र तत्खंडपटे व्यभिचारः तद्वह्न्य

समवधानकालीनतादृशयावत्कारणस्वप्रागभाववत्तंतुतत्संयोगध्वंसात्यंताभावा
दिजन्यत्वादितिचेन्न। प्रतिबंधकसंसर्गाभावस्यैव कार्यहेतुत्वेनखंडपटहेतुम
हापटनाशप्रयोजकेरपितादृशयावत्कारणांतर्गतत्वेनतन्नतद्धर्म्यसमवधानका
लीनत्वाभावात्। नचतत्रतन्नतंतुसंयोगस्यविशिष्यहेतुत्वावश्यकतयामहा
पटनाशप्रयोजकेर्विशेष्यहेतुत्वेमानाभावेनकालोपाधिर्दिगुपाधिस्याद्युत्पन्नफलोप
धायकत्वरूपकारणत्वस्यैवात्रनिविष्टतयातस्ययावत्कारणांतर्गतत्वेन
व्यभिचारोदुर्वारएवेतिवाच्यं। विनिगमनाविरहेणमहापटनाशप्रयोजकेर्विशिष्य
हेतुत्वस्यावश्यकत्वात्। नचतन्नतंतुसंयोगस्यविशिष्यहेतुत्वेतंतुसंयोगत्वादि
नासामान्यरूपेणक्लृप्तहेतुत्वमेवविनिगमकमितिवाच्यं। तन्नाशप्रयोजकेर
पिप्रतिबंधकसंसर्गाभावत्वेनसामान्यरूपेणक्लृप्तहेतुत्वस्याविशेषात्। अस्तु
वातन्नाशप्रयोजकेर्विशेष्याहेतुत्वंतथापिनक्षतिः आद्यतंतुवह्निसंयोगप्रागभावका

भवानं.टी. त्तीनद्रव्यात्यंताभावात्तित्यसामग्रीजन्यत्वेन निरुक्तसात्यंताभावादेवरत्वं ऽपरे व्यभिचा
२५ रवारणसंभवात्। नवीनास्तु स्वाधिकरणदेशावच्छिन्नवन्ह्यभाववत्स्वाव्यवहितपू
२५ र्वक्षणकंयद्यत्स्वं तद्भेदकूटवत्त्वं सत्यंतार्थः स्वीयवन्हिसत्समवधानेतरयावत्कार
णत्वावच्छेदेन स्वाधिकरणदेशावच्छिन्नवन्हिसमवधानाभाववत्क्षणवृत्तित्वं यत्र
तिष्ठति तादृशस्वत्वं च विशेष्यदलार्थः पूर्वोक्तस्थलेषु तादृशयावत्कारणानां
प्रत्येकं तादृशक्षणवृत्तित्वेपि यावत्त्वविशिष्टानामतथात्वान्न व्यभिचारः तद्वन्हि
जन्यधूमघण्डैकत्वीयस्वप्रागभावपरमाण्वेकत्वादितादृशयावत्कारणत्वावच्छे
देन तादृशक्षणवृत्तित्वस्य तादृशक्षणसंबद्धतादृशधूमघण्डकरूपस्वाधिकर साम २५
णदेशावच्छिन्नतया न तादृशैकत्वेपि व्यभिचार इत्याहुस्तन्न स्वं उपदर्शितरीत्यैव
सर्वत्राव्यभिचारेण यावत्कारणत्वावच्छिन्नत्वादिनिवेशे गौरवात्। किंचात्र स्वाधि
करणत्वं संयोगसंबंधेन संबंधसामान्येन वा तद्घटितविशेषणमुपलक्षणं वा नाद्यः स्वा

अवच्छिन्नधूमवृत्तेस्तस्यासत्त्वेन स्वावच्छिन्नधूमवृत्तिवह्न्यभाववद्वृत्तित्वविशिष्टाधिक
रणस्यानवच्छेदकतायाः प्रसिद्धेः न द्वितीयः तथा सति पर्वतीयधूमाधिकरणवाधाद्यव
च्छेदेन धूमावच्छिन्नधूमवृत्तेर्वह्न्यभाववत्त्वेनापाद्यत्वप्रसिद्धेः अत एव न संबन्धसामान्येन
कल्पद्वयमपीति दिक्। केचित्तु धूमस्य संयोगेन वह्निजन्यतया संयोगसंबन्धावच्छिन्नतादृश
मावत्कारणजन्यत्वाभावस्यापाद्यस्य नकोऽपि दूषकत्वमित्याहुः कालोपाधिविषयेति
।। दिग्गुपाधिविषयाचेति शेषः नाप्रसिद्धिरिति। न च तथापि दण्डादेः कारणगतरसविशेष
स्येव धूमेऽपि कारणगतस्पर्शविशेषस्य हेतुतया यावदादृशकारणगतस्पर्शस्यावच्छेद
समवधानकालीनत्वाभावेनाप्रसिद्धेरस्येवेति वाच्यं। तस्य तद्वह्निसमवधानेतरेऽपि ने
ववाररणगतरसविशेषस्पर्शविशेषाणां कारणतावच्छेदकत्वमेव न तु कारणत्वमि
ति मताश्रयणादिति। तत्साधारणस्येवेति। आद्यवह्निचरमवृत्त्येतदन्यतरत्वरूपस्ये
त्यर्थः वक्ष्यमाणत्वेति। तद्वह्निविशेषणत्वे इत्यादिः तद्वह्नित्वेनेति। तद्वह्न्यसमवधानका

भवानं·टी०
२५

लीनेस्य तत्तद्वह्निपरत्वेनेति शेषः। नन्वेवमपि वेति। धूमकारणीभूतचरमवह्निव्यक्तेर्यावत्तादृशका
रणान्तर्गततायाः तद्धूमसमवधानकालीनत्वादिति भावः। न चैवं दीधितौ वह्निपदस्या
द्धानासंगतिरिति वाच्यं चरमवह्निव्यक्तिविशेषोपादानतात्पर्यग्राहकतयैव तदुपादा
नसंगतेः उपलंभकतावच्छेदक इति। प्रतियोग्युपलंभकयावद्व्यक्तिसमवधानस्यै
कदा ऽसंभवादिति भावः। कारणतावच्छेदक इति। अन्यथा तादृशयावत्कारणान्तर्गता
र्धनादेस्सामान्यतो धूमसमवधानकालीनत्वाभावेनाप्रसिद्धिः स्यादिति भावः। प
र्यवसितार्थ इति। विशेष्यदले स्यादिः अत्र सत्यन्तं वह्निसमवधानकालीनत्वं यथाश्रुतार्थ
कमेव वह्नेर्वह्नित्वेनैव निवेश इति ध्येयं। नन्वेवमपि धूमसमवायित्वरूपधूमावयवत्व राम २५
स्य तत्संयोगत्वरूपधूमावयवसंयोगत्वस्य च तादृशयावत्कारणतावच्छेदकान्तर्गत
स्य वा धूमसमवधानकालीनवृत्तित्वाभावादप्रसिद्धिरत आह धूमावयवस्य चेत्यादि।
अवलोच्छेति। उपलक्षितेत्यर्थः। क्वचिदिति। वस्तुगत्या धूमावयव इत्यर्थः। धूम इति समवा

येनेत्यादिः क्वचिदिति घटाघटयवद् इत्यर्थः। नियामकस्येति। नियामकांतरस्येत्यर्थः अलाभा
दिति। अयमाशयः धूमसमवायित्वं समवायेन धूमवत्वमेव। तच्च न समवायेन धूम
त्वं दुर्वारमिति। वस्तुतस्तेन रूपेण हेतुत्वे गौरवमेव बाधकं द्रष्टव्यं। रसविशेषस्पर्शविशे
षादेः कारणत्वमतानुसारेणाह पृथिवीत्वेन वेति विशेषरूपेणापि धूमावयवसंयोग
त्वादिना व्यभिचाराभावादिति अतिप्रसंगस्य तु स्पर्शविशेषहेतुतयैव निरासादिति भावः
साध्यसिद्धिरिति। पृथिवीत्वस्य तादृशादेः जात्यस्य च यावत्कार्यतावच्छेदकांतर्गतस्य वन्ह्य
समवधानकालीनवृत्तित्वादिति भावः परमाण्वादावादिति। महाप्रलयानंगीकारे ले
दं तदंगीकारे त्वाह। तादृशेति। द्रव्यारंभकतावच्छेदकेत्यर्थः अनिर्णयात्। निर्णेतुम
शक्यत्वात्। दिशेति। पूर्वोपदर्शितेत्यादिः तद्व्यक्तिपरत्वे तदावश्यकत्वे सामान्यतो वन्ह्य
समवधानकालीनत्वनिर्णयमभ्युपेत्य दूषणांतरमाह नांतरीयकेतिप्रसिद्धेत्या
दिः व्यापकधर्मस्यान्यथासिद्धत्वादाह धूमत्वेन वेति। तादृशेति नीलाद्यात्मकेत्यर्थः

भवानं०टी० २९ एवमग्रेपि। लाघवादाह वयवस्थितित्वमनिवेश्याह। तादृशरूपत्वेनवेति। अतिप्रसंगवारणोपायं
दर्शयति स्वसमयीवा ति। तथा चेत्यादि। तथा च सामान्यतो वह्न्यसमवधानकालीनत्वस्या
निवेशेन धूमस्वरूपादौ व्यभिचारेण तु वह्निपदस्य लक्षणया वह्निपरत्वमुपेत्य महत्करीत्या निष्कर्ष
स्यावश्यकत्वे कारणतावच्छेदके यावत्त्वनिवेशनमसमंजसमेवेति भावः। एतेनात्रापाद्य
कोटौ वह्निपदस्य तद्वह्निपरत्वे आपादककोटावपि तद्वत्स्वरूपं वा व्यमत्यथा वह्नित्वेन वह्नि
जन्यत्वाभावस्यापादकत्वे तद्वह्निजन्ये तद्वह्निरूपादौ व्यभिचारः स्यात् तथा च वह्निजन्य
त्वतद्वह्निजन्यत्वयोर्विभिन्नपदार्थतया एतन्नकस्य धूमत्वावच्छेदेन वह्निजन्यत्वापर्यव
सानेन प्रकृतानुपयोगप्रसंग इति वह्निपदं वह्निसामान्यपरमेव वह्न्यसमवहिता अन्यत्वं राम
च सामानाधिकरण्ये धूमत्वावच्छेदेन वह्निरूपसामग्रीकाल्पत्वमेव। वह्न्यसमवहिता २९
अन्यत्वविशिष्टवह्न्यसमवधानकालीनयावत्कारणकत्वमप्रसिद्धमतो वह्नितत्समव
धानेतरेति यदि च निरुक्तविशेषणविशेष्ययोरुभयत्वावच्छिन्नाभाव एवापाद्यते ननु विपि

26

भावस्तत्तत्त्वविभिन्नाधिकरणयोरुभयोः प्रसिद्धिसंभवेपि धूमे वन्ह्यसमवधानकालीन
यावत्कारणकत्वं नास्ती त्यत इष्टापत्तिरतो वन्हितत्समवधाने तरेति। अनयोरेकैकोपा
दानेपि तद्दोषतादवस्थ्यमतो द्वयमुपात्तं नांतरीयकवन्हिके च तदीय यावत्कारणांत र्भू
तस्यैव वन्ह्यसमवधानकालीनत्वाभावान्न व्यभिचारः वन्ह्यसमवधानकालीनेत्यस्य
यावत्त्वस्यवानुपादाने तत्रैव व्यभिचार इति तदुभयमुपात्तं वन्हिसमवधानपदं चा
त्र वान्हिप्रयोज्यो त्पत्तिकविशिष्टधूमकारणपरं तच्च तत्तत्संयोगादि ननु वन्हिप्रयोज्यो
त्पत्तिकमात्रपरं तथा सति धूमस्यापि तादृशत्वेन नांतरीयकवन्हिके व्यभिचारता
दवस्थ्यात्। अत्र वन्ह्यसमवधानकालीनत्वं वन्ह्यभाववत्कालवृत्तित्ववन्ह्यभाव
वद्देशवृत्तित्वयोरन्यतरवत्त्वं तेन धूमादिप्रागभावानां वन्ह्यभाववद्देशवृत्तित्वा
भावेपि । आर्द्रेधनादीनां च वन्ह्यभाववत्कालवृत्तित्वाभावेपि धूमे न प्रतियोग्यप्र
सिद्धिः न च वन्ह्यसमवधानकालीनेत्यस्य वन्हिसंयोगाभावकालीनेति यथाश्रुता
र्थपरित्यागबीजाभाव इति वाच्यं तथा सति धूमादेरपि तादृशत्वेन नांतरीयकव

भवानं·दी
२७ ह्निके व्यभिचारस्तादवस्थ्यापत्तेरितिकेचिन्मतंपरास्तं। विशेषहेतुहेतुमद्भावग्राहक
प्रमाणमेवलाघवज्ञानादिसहकारेणकारणताकार्यतावच्छेदकयोस्तत्त्वांस्वपदंवि
२७ हायवह्नित्वधूमत्वाभ्यांहेतुहेतुमद्भावंपरिच्छिनत्तीत्यस्यदीधितिकारेणैववक्ष्यमाण
तयावह्निपदस्यतद्वह्निपरत्वेपिएततर्कस्यधूमत्वावच्छेदेनवह्निजन्यत्वपर्यवसानेन
प्रकृतोपयोगसंभवात्। भवदुक्तरीत्याप्युक्तादृशसामान्यतोवह्न्यसमवधानकाली
नत्वस्यनिर्णयासंभवाच्च। अत्रेदंबोध्यं यत्रमणिसंयुक्तेंधनेवह्निसमवधानंतत्रउत्ते
जकसमवधानंतत्रतदनंतरोत्पन्नदाहसमानकालोत्पन्नउत्तेजकाभावविशिष्टमणिप्रति
बध्येनांतरीयके व्यभिचारः तत्रवह्न्यसमवधानकालेतादृशमण्यभावस्यदेशांतरकार्या
धिकरणदेशेचसत्वेनतद्धीययावत्कारणांतर्गततादृशमण्यभावादेर्वह्निसमवधानप्रा राम
गभावकालीनत्वात् भवतुतादृशदाहसमानकालोत्पन्ननांतरीयकंमत्यपिमण्यादेः २७
प्रतिबंधकत्वेमानाभावइतिवाच्यं। तत्सत्वेतादृशनांतरीयकानुत्पादेनतस्यापितत्प्रति
प्रतिबंधकत्वस्यावश्यकत्वात् एवंचतत्कारणीयकार्याधिकरणदेशेतद्वह्निसमवधाना

व्यवहितपूर्वक्षणस्य कौ वह्निसमवधानप्रागभावक्षणस्तत्त्वावच्छेदेन कारणतावच्छेदक
संबंधेन प्रत्यासन्नत्वं यत्तादृशायां वत्कारणं तत्कत्वाभाव एवापाद्यः तथा च वह्नितत्समवधा
नेतरस्य तत्र वह्निपदानुपादाने धूमादिकारणदशीकारणतावच्छेदकीभूतसंयोगसंबं
धेन तादृशवह्निसमवधानप्रागभावक्षणावच्छेदेन वह्नेः प्रत्यासन्नत्वाभावेन धूमे
ऽव्याप्तिरतस्तत्र वह्निपदोपादानं केचित्तु पत्रध्वंसं संयोगः कारणं तत्र संयोगेन ध्वंसमपि
कारणमिति नियमे मानाभावेन मणिप्रतिरुद्धवह्निसंयोगाद्यन्नरूपपरावृत्तिः प
श्चादुत्तेजकसमवधाने रूपपरावृत्तिस्तत्र वह्निसंयोगस्यैव कारणतया वह्निजन्यत्वा
भावरूपापादकं वत्तिवन्यसमवधानकालीनवह्नितत्समवधानेतरयात्कारण
के तत्र व्यभिचार इति तन्न कारणयकारणपदमवश्यं कारणताघटकफलोपधायक
प्रत्यासन्नविशिष्टपरमवश्यं वाच्यं तथा च तत्रोत्तेजकाभावविशिष्टमण्यभावस्य
तत्कालीनत्वविशिष्टविशेषणताया एव फलोपधायकतानियामकतया न तत्र

भवानं॰टी॰
२८

वन्ह्यसमवधानकालीनवन्हितत्समवधानेतरत्तद्विशिष्टव्यावत्कारणकत्वमतोनव्यभिचारः
एवंचवन्हेरपिवन्ह्यसमवधानेकालेतादृशप्रत्यासत्तिविशिष्टत्वाभावात्प्रसिद्धिरतो
वान्हितत्समवधानेतरेत्यत्रवन्हिपदमपिसार्थकमेवेत्याहुः।अन्येतुवन्ह्यसमवधान
कालीनेत्यस्यफलमितितत्रतिव्यापेनव्यापारसमवहितस्यवन्हेः प्रागभावकालीनत्व
मर्थः व्यापारसमवहितत्वेन धूमजनकवन्हेस्तद्वन्हित्वेनोपादानत्वाभावात्तद्वन्हिप्राग
भावकालीनत्वस्यचतद्वत्ताव्यभावात्प्रसिद्धिवारणाय वन्हितत्समवधानेतरेत्यत्रवन्हि
पदस्यसार्थकमित्याहुस्तदेतत्सर्वमभिप्रेत्याहेत्यलमधिकेनेति।यत्तुनांतरीयकेतीति राम
।एतन्मतेजन्यत्वंयथाश्रुतमेवनतुवन्ह्यसमवधानकालीनेत्यादिरूपं।यद्यप्येतन्मते २८
आपादककोटौसत्यंतार्थविशेषणस्य घटादावेवव्यभिचारवारणायोजनंसंभवति
तथापिविवरणीयस्यसत्यंतार्थस्यव्यावृत्तिंदर्शयितुंनांतरीयकवन्हिकपर्यंतानुधाव
नंवन्हिजन्यत्वाभावइति।वस्तुतउत्पाद्युपदर्शितयुक्तेरेतन्मतेपिवन्हिसमवहितजन्यत्वे

वह्निजन्यत्वपर्यवसितं वाच्यमित्याशयः। दीधितौ आपादककोटावेव। आपादककोटिप्रविष्ट
त्वात्। हि जन्यत्वाभाव एव। एवकारेण बाधकोटिप्रतियोगिविशेषणत्वव्यवच्छेदः। व्यापकत्वा
भा। मूले इति। जन्यो न स्यादिति मूलेत्यर्थः। यथाश्रुतेन। यथाश्रुतसत्वं तार्थेन व्यभि
चारेति। नान्तरीकवह्निकइत्यादिः। धूमेऽपि नास्तीति। न चैतावता आपादकासिद्धिर्व्या
सा च तर्कैर्गुरुत्वेनैवेति वाच्यं। सामग्रीपदानुपादाने धूमो यदि वह्न्यघटिताजन्यत्वे स
ति वह्निजन्यो न स्यात् तदा जन्यो न स्यादित्यस्य तर्काकारतया तत्र विपर्यये वह्निजन्यत्व
कोटिमात्रपर्यवसानाय पक्षे सत्यं तस्य विशेषणत्वावश्यकतया तत्रिक्षुपासंभव
इत्याशयात्। न च वह्निघटितेति नीति हेतुसम्मूलस्थेन सामग्रीत्वेन वह्नेर्नान्तरीयक
वह्निकाहेतुतया तत्सामग्र्यघटकत्वादिति भावः। अनिश्चयादिति। वह्निधूमका
रणत्वसंदेहेन धूमसामग्र्या वह्न्यघटितत्वसंदेहे जन्यत्वेन निश्चिते धूमेऽपि व
ह्न्यघटितसामग्रीजनत्वस्य संदेहादिति भावः। ननु पक्षे आपादकानिश्चयस्तर्के तु

गुणएवेत्यत आह तथा चेति। आपाद्यकविशेषणे ति। विपर्ययेवह्नि अन्यतत्वकोटिमात्र
पर्यवसानाद्यापादकतावच्छेदककोटेनिविष्टेत्यादिः स्वोक्तेति। वस्तुतइत्यादिना स्वयपरि
ष्कृतेत्यर्थः। अनुसारितयेति वस्तुतइत्यतः पूर्वकल्पे तथोपाख्येति विरोधिचेत्यादिमूल
व्याख्यानस्य वस्तुतइतिकल्पे सत्यंतार्थस्यवह्निविशेषणत्वाभावेनासंभवादिति भा
वः। मूलं किमवन्हेरेवभविष्यतीत्यादिमूलं। दिवह्यतेति। वस्तुतइत्यादिनेत्यादिः। इच्छा
पत्तावितिः। इच्छस्यविशिष्टाभावरूपापाद्यस्यापत्तिरर्थानंतरस्यपर्यवसायितीत्यर्थः। इष्टत्वं
प्रमितविरुद्धत्वाभावः। ऽभयत्रैवशंकाद्वयएवकोटित्वादिति आद्येधूमत्वावच्छेदेनको
टित्वमंत्येतत्सामानाधिकरण्येजनेति द्वयोर्भेदइतिध्येयं। अत्रेदंबोध्यं उक्तशंकाद्वय
स्यवन्ह्यसमवहितान्यत्वरूपापाद्यप्रतियोगिविशेषणसंदेहरूपतयातादृशवि
शिष्टप्रतियोगिसंदेहजनकत्वं तेन च प्रतियोगितासंबंधेन तद्विशिष्टस्याभावरूपापाद्य
स्यसंदेहः। विशिष्टसंदेहंप्रतिविशेषणसंदेहस्यहेतुत्वात् अतएवेच्छापत्तिरूपत्वंविला

येष्टसाध्याभावरूपापाद्यस्य संदेहः विशिष्टसंदेहं प्रति विशेषणसंदेहस्य हेतुत्वात् अतएवेष्टा
पत्तिरूपत्वं विहायेष्टापत्तिपर्यवसायित्वमुक्तं एवं च निर्णयं प्रति संशयसामग्र्याः प्र
तिबंधकतया तादृशापाद्यसंशयजनकसामग्रीसत्त्वेनापाद्यव्यतिरेकनिर्णयरूपा
पत्तिकारणासंभवेन तर्ककारणीभूतापाद्यव्यतिरेकनिर्णयविघटकतया नोक्तशंकाव
यस्य फलानुत्पत्तिनैयत्यस्वरूपं तर्कप्रतिबंधकत्वं अप्यप्रकृततर्के धूमत्वसामानाधि
करण्येनैव धूमस्य पक्षधर्मतावच्छेदकसामानाधिकरण्येन निर्णयं प्रति
तादृशसंशयसामग्र्या अप्रतिबंधकतया कथं धूमत्वसामानाधिकरण्येन
तादृशसंशयसामग्र्यास्तत्सामानाधिकरण्येनापाद्याभावनिर्णयप्रतिबंध
कत्वमिति चेन्न। तद्धर्मसामानाधिकरण्येन तद्व्यक्तिविशेष्यकतन्निर्णयं प्रति
तद्धर्मसामानाधिकरण्येन तद्व्यक्तिविशेष्यकतत्संशयसामग्र्या अपि प्रतिबंध
कत्वस्यानुभवबलेन प्राचीनसंमतत्वादिति ततीयापुनरितीति इदं च वस्तुतइति

कल्पे तत्पूर्वकल्पे च बोध्यं। ननु प्रतियोगिनो हेतोरप्रसिद्ध्याऽहेतुकत्वशंकैवानुपपन्ना
। किं च धूम इत्यस्यानुषंगे सति तस्याधूममात्रविशेषकतया कार्यान्तरे सहेतुकत्वप्र
सिद्धिसंभवेनाप्यादिकाद्यप्रसिद्धिरप्यनुपपन्नेत्यत आह। तथा चेति अपरमतानुसा
रेणाह। सत्त्वव्याप्तीति कार्यसामान्यइतिशंकेत्यग्रेतनेनान्वितं उभयसाधारणपे
नाह कार्याव्यवहितेति कार्यसामान्याव्यवहितेत्यर्थः पूर्ववर्तिन इति सप्तम्यर्थे षष्ठीति
नियतत्वादेरिति कार्यसामान्यनियतत्वादेरित्यर्थः आदिना कार्यसामान्यनियता
व्यवहितपूर्ववर्त्तिनि। अनन्यथासिद्धत्वस्य कार्यसामान्यानन्यथासिद्धत्वकार्यसा राम
मान्यनियताव्यवहितपूर्ववर्त्तित्वस्य परिग्रहः विवक्षितेति मूल इत्यादिः तथा चोक्त ३०
रीत्या प्रतियोगिप्रसिद्ध्या नाहेतुकत्वशंकानुपपत्तिः न वाप्यादिकाद्यप्रसिद्ध्यनुपप
त्तिः अहेतुक एवेत्यत्र धूम इत्यस्यानुषंगे न एवकारमहिम्ना तस्याः कार्यसामान्य
विशेषकतयान्तरानुषंगेपि उभयनिमित्तयाभिन्नरणीतेपि धूमे यदाहेतुकत्वसंशय

स्तत्र कार्यान्तरे व्यभिचार्यकत्वेन तत्संभवेन कार्यान्तरे सहेतुकत्वप्रसिद्धेः कथमप्यसंभवा
दिति भावः अप्राद्येति वस्तुतस्त्विति कल्प्ये आपाद्यापादकयोरुभयोरेव हेतुताघटि
तत्वेनापाद्ये विहेतुतायाः प्रवेशादिति भावः अत एवात्रापादकाप्रसिद्धिः कल्पद्वये
पि आपाद्याप्रसिद्धिस्तु वस्तुतस्त्विति कल्प एवेत्याशयेन दीधितिकृता आपाद्याद्य
प्रसिद्धिरित्यनुक्त्वापादकाद्यप्रसिद्धिरित्येवोक्तमिति ध्येयं । दीधितावप्रसिद्धेरिति ।
तथा चापादकाद्यप्रसिद्ध्या तद्घटितव्याप्तिनिर्णयासंभवेन तद्धि घटकतया मूल
शोषितत्संपादकत्वेनाहेतुकत्वशंकायास्तर्कप्रतिबंधकत्वमिति भावः पर्यवसा
यिनीति । अत्र विशेषस्य प्रसिद्धेर्न विशिष्टाप्रसिद्धिरूपत्वं किं तु तात्पर्यपर्यवसायित्व
मेवेत्याशयेनाप्रसिद्धिरूपेत्यनुक्त्वा पर्यवसायिनीत्युक्तमिति ध्येयं । केचित्तु धूम
मात्र विशेष्यके वा हेतुकत्वशंका । न चैवं कार्यान्तरे सहेतुकत्वप्रसिद्ध्याऽप्रसिद्धि
58 पर्यवसायिनीत्यसंगतमिति वाच्यं । अप्रसिद्धिशब्दस्य निर्णयभिन्नज्ञानपरतया

भवानंदी·टी· ३१ 31

पर्यवसायिनीसंतेन धूमविशेष्यकापाद्यकानाहार्यसंदेहसंपादकत्वप्रतिपादनेनासं
गत्यभावात् एवं च तस्या आपादकांशे नाहार्यसंदेहसंपादकतया व्यभिचारसंपा
दकत्वेन तर्कमूलीभूतव्याप्तिनिर्णयविघटकतया मूलशैथिल्यसंपादकत्वेन त
र्कप्रतिबंधकत्वं तथा हि । अहेतुकत्वस्य वह्निजन्यत्वाभावव्याप्यतया ऽहेतुकत्व
संदेहस्य तद्व्याप्यसंदेहरूपतया वह्निजन्यत्वाभावरूपव्यापकसंदेहसंपादकता
व्याप्यसंदेहस्य व्यापकसंदेहहेतुत्वात् । तथा चापाद्याभाववत्वेन ज्ञाते पक्षे धूमे
तादृशसंदेहस्याबाधव्यभिचारसंदेहरूपतया तर्कमूलव्याप्तिनिर्णयप्रतिबंध
कत्वं । अथाहेतुकत्वशंकाया आपादकसंदेहजनकत्ववदापाद्यसंदेहस्यापाद्या राम
भावांशे संदेहात्मकतया न व्याप्तिग्रहप्रतिबंधकत्वं साध्याभावांशे निर्णयात्म ३१
कव्यभिचारज्ञानस्यैव तत्प्रतिबंधकत्वादिति चेन्न तावताप्यहेतुकत्वशंकाया
आपाद्यसंदेहजनकसामग्रीत्वेन तर्ककारणीभूताबाधव्यतिरेकनिर्णयविघटक

त्वशंकाया आपाद्यसंदेहजनकसामग्रीत्वेन तर्कस्याङ्गीभूतापाद्यव्यतिरेकनिर्णय
विघटकतया तर्कप्रतिबंधकत्वस्यानपायात् । अत एव दीधितावेतदभिप्रायेणैवा
पाद्यकाद्यप्रसिद्धिपर्यवसायिनीत्यत्रापाद्यापादकमात्रविपक्षोपादानमिति प्राहुः आरब्धा
यां विशेष्यत्वाभावेन तद्वारा । तत्प्रयुक्तविशिष्टाभावमादायैत्यादावत्र । वह्निधूमा
दितीति । तथा च तन्निष्ठत्वेन वह्निर्यत्रेति धूमस्य स्याद्वह्नेरित्यस्य वह्निधूम्यादित्यस्यार्थः
वह्न्यसमवहिताद्विनियावदितिभावः । इदमुपलक्षणं वह्निं विनापीत्यस्यापि वह्निस
मवहितं विनापीत्यर्थो बोध्यः । कृतेरिति । इदमुपलक्षणं । तस्योपादानं यस्मादि
ति ब्युत्पत्त्या तदुपादानपदार्थक्रियायाश्चेत्यपि द्रष्टव्यं । कृत्यानुरोधेनेति तादृश
कृत्याद्यन्वयव्यतिरेकानुविधानस्यानन्यैवशंकाप्रतिबंधकत्वलाभादिति भा
वः कृतेः सर्वत्र स्वक्रियाव्याघातः स्वस्य क्रियाधर्मभोजनादितेन व्याघातः प्रति
बंधः दीधितावग्रे तन्नमिति । स्वक्रियाया एव शंकाप्रतिबंधकत्वात् स्वक्रियैव शंका

भवानं॰टी॰
३२

प्रतिबंधिके स्यग्रेतन ग्रंथघटकमपि स्वर्थः प्राक्तनस्वक्रियापदस्य स्वक्रियानुत्पादपरतया का
रणं विना स्वक्रियानुत्पादस्य व्याघातइत्यर्थलाभमादायस्वक्रियापदस्य स्वक्रियोत्पा
दपरतया कारणं विनैव स्वक्रियोत्पादे व्याघातइत्यर्थलाभमादायवा कदाचिन्निर्वाहसं
भवेन प्राक्तनमपी त्यनुक्त्वाग्रेतनमपीत्युक्तं। व्याख्यायां प्राक्तनमपि सर्वत्र स्वक्रियाव्या
घात इति प्राक्तनग्रंथघटकमपि सम्प्रदायइति तदपि तत्परं तादृशान्वयव्यतिरेकानु
विधानबोधपरमित्यर्थः स्वं क्रियतेऽनेनेति कारणमुत्पत्त्या स्वस्य क्रियायस्मादिति मु
त्पत्त्यासाधारणस्वक्रियापदेन तादृशबोधलाभसंभवादितिभावः पद्याश्रुते। उपादानपद
स्वभावमुत्पत्तौ क्रियापदस्य कर्मप्रत्यत्तौ वदीधितौ मानाभावादिति। व्याघाताभावाव
वगाहि निर्णयत्वाभावादितिभावः मणिमंत्रादिन्यायेन प्रतिबंधकत्वसंभवादाहका
रणत्वेति। शंकाप्रतिबंधइति। तर्कोत्पत्तिरितिशेषः। अत्र तादृशान्वयव्यतिरेकानु
विधायित्वज्ञानस्य व्याघाताभावाभावानवगाहित्वेपि तादृशशंकात्रयप्रतिबंधक

राम
३२

त्वं विरोधप्रदर्शनं तत्र यामाधिमंत्रादिन्यायेनवेति ध्येयं । केचित्तु तस्य प्रथमशंकाप्रतिबंधकत्वं बाध
निश्चयविधया वह्निसत्वेऽत्पद्यमानत्वे सति वह्निं विनानुत्पद्यमानत्वरूपस्य तस्य वह्न्यसम
वहिताजन्यत्वघटितत्वात् । वह्निं विनानुत्पद्यमानत्वस्य वह्न्यसमवहिताजन्यत्वरूपत्वात् । द्वि
तीयतत्तीयशंकाप्रतिबंधकत्वं च तस्य वह्न्यसमवहितजन्यत्वाभावाहेतुकत्वाभावयोरवच्छे
दकधर्मदर्शनविधया तदुभयोस्तादृशान्वयव्यतिरेकानुविधायित्वावच्छेदेन सत्वात् । न
नु तस्य द्वितीयशंकाप्रतिबंधकत्वमपि बाधनिश्चयविधयैव संभवतीति वाच्यं । सामाना
धिकरण्येन विशिष्टबुद्धिं प्रति सामानाधिकरण्येन बाधनिश्चयस्याप्रतिबंधकतया धूम
तत्सामानाधिकरण्येन तस्य तत्सामानाधिकरण्येन वह्न्यसमवहिताजन्यत्वकोटिकसंशये
प्रतिबंधकत्वासंभवात् । न च सामानाधिकरण्येनावच्छेदकधर्मदर्शनस्यापि सामानाधि
करण्येन विशिष्टबुद्धावप्रतिबंधकतयावच्छेदकधर्मदर्शनविधयापि तस्य न द्वितीयशं
काप्रतिबंधकत्वसंभव इति वाच्यं । बाधनिश्चयप्रतिबंधकतायां तथा नियमसत्वेऽप्यवच्छेद

कधर्मदर्शनविधयाप्रतिबंधकतायां तथानियमासत्वात्। यदि च सामानाधिकरण्येन तद्विशि
ष्यकवाधनिश्चयस्य सामानाधिकरण्येन तद्विशेष्यकबुद्धिं प्रत्यपि प्रतिबंधकत्वमनुभव
वलेन प्राचीनसंमतमिति विभाव्यते तदा द्वितीयशंकां प्रत्यपि तस्य वाधनिश्चयविधयै
प्रतिबंधकत्वं तृतीयशंकां प्रत्येवावच्छेदकधर्मदर्शनविधया प्रतिबंधकत्वमुपेयमित्याहुः
व्याख्यायां तदवच्छिन्ने कारणताग्रह इति तस्यैव धूमत्वावच्छेदेन वन्हिव्याप्तिग्रहोपयोगित्वा
दिति भावः। विशेषे धूमविशेषे सामान्यतः। धूमत्ववन्हित्वाभ्यां। तादृशजन्यत्वस्य कारणता
दि जन्यत्वस्य दीधितावसंभवादिति। तथा च तत्र वन्हित्वव्याप्यजात्यवच्छिन्ने इव प्रकृतेपि धूमत्व राम ३३
व्याप्यजात्यवच्छिन्ने जन्यत्वग्रहस्संभवतीति भावः। व्याख्यायां तत्र सामान्यतः कार्यकार
णभावग्रहे सामान्यव्यभिचारेति तथा च तत्र वन्हित्वा[illegible]वच्छेदेन व्यभिचारनिर्णया
त्तत्र व्याप्यसाम्यमिति भावः अगुर्वित्ति। अत्र वन्हित्वादेर्व्याप्यत्वाद्यपेक्षया लघुत्वाभा
वेन तन्नाधिक्यमुक्त्वा गुर्वित्युक्तं। तदवच्छेदेनैव तादृशवैजात्यावच्छेदेनैव लाघवानवतारः।

लाघवाज्ज्ञानाभावः सामान्यत इति। तथा च दीधितौ सामान्यतस्तं परिच्छिनत्तीत्येव पाठ इ
त्याशयः क्वचित्तु सामान्यत एवेत्यपि पाठोऽस्ति तत्र एवकारो व्यर्थो बोध्यः केचित्तु सा
मान्यत एवेत्येव पाठः सामान्यधर्मावच्छेदेनैवेत्यर्थः एवकारेण विशेषधर्माणामव
च्छेदकत्वव्यवच्छेदः अत एव विशेषकार्यकारणभावस्य परीक्ष्याद्धूदसंमतत्वम
पि संगच्छते इति वदन्ति। तच्चिन्त्यं। न च यत्सामान्ययोः कार्यकारणभाव इति न्यायेन
विशेष्यापि कारणत्वमिति वाच्यं इत्यमुपजीव्य तथा सामान्यतः कार्यकारणभा
वस्य हृत्वात् अन्यथोपजीव्यव्याघातापत्तेरित्यग्रे तन्न परिष्कारेऽपि पर्या
लोचनया विशेषकार्यकारणभावेऽपि परीक्ष्याद्धूदसंमतत्वस्यास्फुटत्वात्। धू
मत्ववह्नित्वावच्छेदेनेति। अत्रेदं बोध्यं। वह्निं विनापि देशान्तरगते धूमे धूमोत्पत्ति
दर्शनेन तादृशधूमजन्यधूमे व्यभिचाराद्धूमत्वं न वह्निजन्यतावच्छेदकं किन्तु त
द्व्यावृत्तं वैजात्यमेव एवं वह्न्यभावस्यापि देशे धूमजन्यधूमसत्त्वेन धूमत्वं न

भवानं॰ टी॰
३७
34

वन्हिव्याप्यतावच्छेदकं किंतु वन्हिजन्यतावच्छेदकं तादृशवैजात्यमेव। तादृशविजाती
यधूम एव वन्हिव्याप्यः वस्तुःअछिविशेषणविशिष्टोधूमोवन्हिव्याप्यइतिप्राची
नप्रवादोप्येतदर्थक एव तादृशवैशिष्ट्यस्य तादृशवैजात्योपलक्षकत्वात्। अतए
वप्रकृततर्कस्य धूमत्वावच्छिन्नव्याप्तिग्रहोपयोगित्वासंभवेन प्रकृतोपयोगित्वासंभ
वपक्षं कापि निरस्ता। तादृशविजातीयधूमस्य चक्रे वर्त्नसंयोगसंबंधेन देशांतरे के
वलोत्पत्तिसंबंधेन च स्वावयवे दर्शनादुत्पत्त्यवच्छिन्नसंयोगसंबंधस्संयोगावच्छिन्नोत्प
त्तिरेव वा जन्यताव्याप्यतयोरवच्छेदकः उत्पत्तिश्चाद्यक्षणसंबंध एव परं तु अत्रायमनोत्प
संबंधेनोत्पन्न इति व्यवहारोयत्र जायते तत्रैव तेन संबंधेन तदुत्पत्तिः स्वीक्रियत इति त रा म ३८
स्य देशांतरस्यावयवव्यावृत्तत्वं पर्वतादिसाधारण्यं चोपपद्यते। एतेनाद्यक्षणे धूम
संयोगाभावादुत्पत्तिसंयोगयोर्विभिन्नकालीनतया वैयधिकरण्येन चक्रस्यावच्छेद्या
वच्छेदकभाव इति शंकापि निरस्ता यद्वा संयोगसंबंधावच्छिन्नाधिकरणत्वस्य व्याप्यवृत्ति छि १

तथासंयोगस्यानेतस्यैवनिवेशेन न कोपि दोषः वन्हिनाधूमजनने योवांतरव्यापारः ससर्वो
पि जनकताव्यापकतयोरवछेदकसंबंधः अतएवमण्यादिसत्वेनवन्हिनाधूमोत्पादः सं
योगएववातदवछेदकसंबंधः धूमंप्रत्यपिमण्यादेः प्रतिबंधकत्वाच्चनतत्सत्वेधूमोत्पो
त्पादः एवंचात्रधूमत्वंवैजात्योपलक्षकं एतेनास्तुयथातथावन्हिधूमयोः कार्यकार
णभावग्रहस्तथापितादृशंवन्हिधूमयोर्व्याप्तिग्रहेपयोगीअवछेदकधर्मसंबंधयो
र्भेदादितिकेशांचिद्दूषणोद्धारणमपिपरास्तमिति। केचित्तुधूमत्वमेवजन्यतावछेदके
तादात्म्यस्यसमवायस्यवाजन्यतावछेदकसंबंधत्वात्स्वप्रयोज्यरूपस्यजनकता
वछेदकसंबंधत्वाच्चनधूमजन्यधूमेव्यभिचारः अतएवमण्यादिसत्वेन धूमोत्पादप
त्तेरपितत्प्रतीतेनसंबंधेनवन्हेरसत्वात्। नचधूमेरूपविशेषवत्वधूमेरूपविशेषोहे
तुरेवास्त्विति वाच्यं। अनुभवसिद्धहेतुताकवन्हेः कारणतावछेदकसंबंधतयैवोपपत्तौ
तस्यकारणतांतरकल्पनानौचित्यात्। अतएवनीलधूमादिभेदेनतस्याननुगमेपित्व

ख्यातिः संबंधाननुगमस्याप्रोषत्वादित्याहुस्तन्नावच्छेदकसंबंधभेदेन कार्यकारणभाव
ग्रहस्य व्याप्तिग्रहानुपयोगित्वापत्तेः ननु पयोरन्वयव्यतिरेकग्रहस्तयोरेव कार्यकारण
भावग्रह इति विरोधान्वयव्यतिरेकग्रहात्कथं सामान्यतः कार्यकारणभावग्रहः अन्यथा
यस्य कस्यचिदन्वयव्यतिरेकग्रहाद्यस्य कस्यचित्कार्यकारणभावग्रहप्रसंगादत आह
दीधितौ प्रामाणिकी चेति चेदिति व्याख्यायां ताहृशकार्यकारणभावेति विशेषकार्यका
रणभावेत्यर्थः ताहृशव्याप्तिज्ञानेति इत्थं च कार्यकारणभावग्रहस्यैव व्याप्तिपरिच्छेदक
त्वमपि प्रायेण तेषां वतास्ते कथं वह्नि जन्यत्वग्रह इत्युक्त्या न तद्विरोध इति ध्येयं। अत ए
व लाघवज्ञानेन ताहृशसामग्रीवैशिष्ट्यनिवेशादेव अत एव उत्तेजकतावच्छेदककोटौ नि 
वेशादेव तर्कस्य न वैफल्यमित्यादि। अत्रायमाशयः। तर्कस्य पूर्वोपदर्शितरीत्या व्याप्यश 
ङ्कार्यशंका प्रतिबंधादिरूपं फलमस्त्येव ताहृशोत्तेजकसंपादनमपि फलांतरं तर्कस्य
एवं चात एवेत्यत्र एवकारो व्यर्थ ताहृशोत्तेजकसंपादकतयैतस्य ताहृशोत्तेजकसंपादक

तथापीत्यर्थः। वस्तुतस्तु अतएवेत्यादिकं यथाश्रुतमेवैकत्यमित्यस्य प्रकृतसामान्यव्या
प्तिग्रहोपयोगाभावार्थकतयोक्तफलस्यस्य तोकिंचित्करतया विशेषकारणताग्राहक
तयातत्सामग्र्यंतर्गतत्वेन तर्कस्य तत्फलकत्वेतत्सामग्रीघटकत्वेनोत्तेजकतया प्रकृत
व्याप्तिग्रहोपयोगेऽक्तफलकत्वस्योत्तेजकसंपादनएवपर्यवसानात्। न च तर्कस्योत्तेज
कतयाप्रकृतव्याप्तिग्रहोपयोगस्यतस्यैव व्याप्तिपरिछेदकत्वादिति ग्रंथव्याख्यानका
रणएव व्याख्या अभिहितत्वेनात्र पुनस्तदभिधानेपौनरुक्त्यप्रसंग इति वाच्यं। पूर्वमु
क्तस्यापि प्रसंगादस्फुटत्वार्थं नन्वेवमित्यादिना व्युत्पन्नाभ्यधिकाशंकाव्यवच्छेदा
र्थं चात्राभिधाने दोषाभावात्। किंच तर्कस्योक्तफलकत्वमपि नास्ति तथाहि तर्कस्य
पूर्वोपदर्शितरीत्यापादकाहार्यशंकाप्रतिबंधो न फलं तर्कस्यापादकज्ञानमनिष्ट
साधनमित्याकारकंतत्त्वत्तत्फलकत्वसंभवेन तदभावेन तत्फलकत्वासंभवात्। अ
थान्वयव्यतिरेकाभ्यामनिष्टसाधनताज्ञानस्यैव तर्कस्यापीछाविरोधित्वं तदनादरे अनि

भवानं॰टी॰
३९
38

साधनत्वाज्ञानस्याप्यविरोधितापत्तेरिति तर्कस्य तत्फलकत्वं अप्रवातकोत्तरस्यापादक
ज्ञाने निष्ठस्यापाद्यज्ञानस्य मननसाहेतुत्वग्रहस्तत्र आपादकज्ञाने इच्छानिवृत्तिरिति
तर्कस्य तच्छंकाप्रतिबंधे प्रयोजकत्वेन तत्फलकत्वमिति चेन्नैवं तावतापि धर्म्यघटित
स्यैव तर्कस्योक्तरीत्या तत्फलकत्वसंभवेन तत्र धर्मिनिवेशवैयर्थ्यं तदवस्थमेव यदीत्यादि
धर्मिघटितस्य तर्कस्य वैफल्यापरीहारात्। किंचानाहार्यापादकज्ञानस्यैवानिष्ठसाधन
तयात्तत्र द्वेषसंभवेनेच्छाविरहेप्याहार्यतत् ज्ञानस्यानिष्टसाधनताभावेन तत्र द्वेषासं
भवेनेच्छाविरहासंभवात्प्रोपदर्शितरीत्यापि तर्कस्य तत्फलकत्वसंभवः अपि च इच्छाघटि राम
तसामग्रीविधानद्वारा तर्कस्योपयोगे तस्या इच्छाविषयातिरिक्तज्ञानमात्रप्रतिबंध ३९
कतया यस्य कस्यापि तर्कस्य यत्र कुत्राप्युपयोगसंभवेनासाधारण्येन व्याप्तिग्रहोप
योगानुपपत्तिरिति नव्यैर्वयाहार्यशंकाया इच्छाघटिततत्सामग्र्याश्च कुप्यं निरासदुक्ति
वाच्यं। आहार्यशंकाया इच्छाघटिततत्सामग्र्या अप्यविरोधितया तन्निरासस्याकिं वि

करत्वात्। अत एव यत्रौ सामग्री यत्र प्रतिबंधिका तत्र तत्संशयोपीति प्राचां प्रवादः ननु त
र्कस्य विरोधिशंकाद्यनिरासकत्वे तत्र चाकारणत्वसंदेहो विरोधितामासादयन्नयेन
तर्केण वर्त्तते इति तर्केण तद्विरोधिशंकायामपनीतायामिति दीधितिग्रंथस्य तर्के
विरोधिशंकादिनिरासद्वारा विशेषकारणता व्यापकसामग्रीघटकत्वाभिप्रायकस्य
तर्कघटितताद्दशसामग्रीविशिष्टस्यादिमाख्याये पक्षस्य चासंगतिरिति चेन्न। त
स्य तदभ्युपगमवादेन संगतेः वस्तुतस्तु तर्कस्यापि उत्तेजकसंपादकतया तर्कस्य
प्रकृतव्याप्तिग्रहे उपयोग इत्यत्रैव तात्पर्यान्नासंगतिः तथाहि दीधितौ तत्र चे
त्यस्य प्रकृतसाध्याभावव्याप्तिग्रहात्मके कारणतानिश्चये चेत्यर्थः अकारण
त्वसंदेहः साध्याभावव्यभिचारसंशयः निवर्त्तते स्वातंत्र्येण तर्कात्मकोत्तेजकसं
पत्त्याप्रतिबंधाद्यस्य यो भवतीत्यर्थः तद्विरोधिशंकायां व्यभिचारशंकायां अपनी
तायां उत्तेजकसंपत्त्याप्रतिबंधाभ्युपगमे सत्यां सामान्यत एव तत्परिछिनत्तीत्यर्थः

भवानं.टी.
३७
37

न्ति दीधितिसंगतिः व्याख्याग्रंथोपि तर्कघटिते स्वस्य तर्कविशिष्टे स्वपर्यकतया र्थे ते स्वस्वातं
त्र्येणोत्तेजकत्वपर इति । नासंगतः अतएव सामान्यव्यभिचारानिर्णयघटिततादृशसा
मग्रीति वक्ष्यति घटितशब्दस्य विशिष्टार्थकत्वात् अन्यथा सामान्यव्यभिचारानिर्ण
यस्य विशेषकारणतायाग्राहकसामग्र्यघटकत्वेनासंगतेः एवं तर्कोपि तादृशकारणताग्रा
हकसामग्रीवेति व्याख्याग्रंथोपि तर्कस्य स्वातंत्र्येणोत्तेजकत्व एव संगच्छते अन्यथा तर्क
स्य तादृशसामग्रीघटकतया पृथगुक्तेरसंगतेः तस्मात्तर्कस्य स्वातंत्र्येणोत्तेजकतया
तत्संपादकत्वेन प्रकृतव्याप्तिग्रहोपयोगे सुवचे तर्कस्य नवैफल्यमित्याहुः दीधितिकृ राम
न्नवीनास्तु व्यतिरेकिसंज्ञादिव्याप्तेर्न तत्संपादककतर्कस्य तद्विशिष्टबुद्धित्वावच्छिन्नप्रति ३७
बंधकत्वमनुभवबलादुपेयते अतएव बद्ध्यादिकं विनाप्याहार्यानाहार्यशंकानिवर्त
कस्तर्क इति तर्कसाफल्यमिति वदंति आचार्यानुयायिनस्तु अन्वयव्यतिरेकाभ्यां मा

यादृक्प्रयुक्तत्वेन रूपेण साध्यकोटिप्रकारकं प्रकृतधर्मितावच्छेदकविशिष्टधर्मिविशेष्यकं
वह्निर्व्यभिचारित्वप्रयुक्तं वा वह्निजन्यत्वाभाववान्वायमित्याद्याकारकं तर्कात्मकमाहार्य
ज्ञानं यद्यपि आपाद्यकोटिप्रतियोगिमत्तया विरोधिप्रमाणवत्तया वा बुद्धिं प्रतिबध्नाति
। विरोधिप्रमाणसंभावनया तत्साधकनिश्चये कुत्रापि नडाप्रामाण्यग्रह इति तत्प्रतिबंधस्या
वश्यापेक्षणीयत्वमिति तर्कसाफल्यं अत एव वस्तुव्यवस्थार्थं सर्वत्र तर्कापेक्षेति प्रवादो
पि संगच्छत इत्याहुरित्यलं विस्तरेण । अनुसंधानेपीति अपिनाननुसंधानसमुच्चयः धीधि
तौ प्रतिबंधकत्वमिति सामान्यतः कार्यकारणभावग्रह इत्यादिः व्याख्यायां कथ्यते इ
ति लाघवज्ञानादिकमनुत्तेजकीकृत्य व्यभिचारनिर्णयं तेन प्रतिबंधकत्वांतरकल्पने
प्यावश्यकत्वादिति भावः सामान्यव्यभिचारानिर्णयेत्यादि । अत्रमाम्याः अनेनरूपेण
प्रतिबंधकतायां व्यभिचारसंशयोन्तर व्याप्तिसंशये व्यभिचारवारणाय प्रतिबंध्यताव
च्छेदककोटौ निर्णयत्वमवश्यं निवेश्यं एवं च तेन रूपेण प्रतिबंधकत्वांगीकारे व्यभिचार

७०
७

निर्णयोत्तरं व्याप्तिसंशयवारणाय व्याप्तिग्रहत्वावच्छिन्नं प्रति व्यभिचारनिर्णयत्वेन पृथक् प्रति
बंधकत्वस्यावश्यकत्वे तेन रूपेण प्रतिबंधकतायां व्यभिचारनिर्णयस्य विशेषणतयाऽनि
वेशानस्य वैयर्थ्येन तद्घटितरूपेण प्रतिबंधकत्वाभिधानमिदं चिंत्यमेवेत्याहुस्तच्चिंत्यं व्या
प्तिसंशयजनकदोषादेस्तेन रूपेण प्रतिबंधकतायामुत्तेजकत्वोपगमेनैवोक्तव्यभि
चारवारणे प्रतिबध्यतावच्छेदककोटौ निर्णयत्वानिवेशेन च व्यभिचारनिर्णयोत्तरं
व्याप्तिसंशयवारणासंभवेन व्यभिचारनिर्णयत्वेन पृथक् प्रतिबंधकत्वस्यावश्य
कत्वात् यद्यपि तेन रूपेण प्रतिबंधकतायां व्यभिचारनिश्चयाभावविशिष्टत्वाद्यवगा 
हं तद्विशिष्टव्यभिचारनिश्चयाभावोत्तेजक इति विनिगमनाविरहेण गुरुभूतकार्यकारण 
भावद्वयस्वीकारापत्तिरिति स्वेतरदपेक्ष्य या व्यभिचारनिश्चयत्वेनैका प्रतिबंधकता तत्र ला
घवज्ञानं नोत्तेजकं व्यभिचारज्ञानत्वेनाप्रतिबंधकता तत्तु तदुत्तेजकमित्येवोचि
तमिति तदपि न अवच्छेदकतायाः व्यासज्यवृत्तित्वेनादोषात् विशेषणभावेनेति इदं च

लाघवाघनुसंधानसत्वे। तदसत्वे तु विशेषणविशेष्योभयभावेनेतिद्रष्टव्यं धूमत्वावछिन्न
मेवेति एवं च दीधितौ धूमत्वावछिन्नस्येति सप्तम्यर्थे षष्ठी अन्वयश्चास्या पादनीयइ
त्यनेनेति ध्येयं। यत्वेतन्मतेपि धूमत्वसामानाधिकरण्येनैव पक्ष्यत्वं धूमत्वावछिन्न
स्येत्यस्य च धूमत्वविशिष्टस्येत्यर्थः। वन्ह्यसमवहिताजन्यत्वस्य यथाश्रुतत्वेनैव प्रकृतेमता
भेदः धूमत्वावछेदेन पक्ष्यत्वेतत्र प्रतियोगिनिरूपणस्याशक्यतापत्ता अंशतः सिद्धसाधनापत्तेरि
ति केचित्तदुक्तं तदसत्। अनुपदमेव तन्नोक्तन्यायेनैत्यादिना धूमत्वावछेदेन प्रतियोगिनिरू
पणस्योपपादनात्। नचतत्रैवस्यादिना धूमत्वसामानाधिकरण्येनैव प्रतियोगिनिरूपणउप
पादितइतिवाच्यं। तादृशनिरूपणस्य वहिरिन्द्रियेसैव संभवेन मनसे वसुधरतमित्यस्यासं
गत्यापत्तेः यद्यपि धूमत्वावछिन्नस्य वह्न्यसमवहिताजन्यत्वस्येत्यन्वयः तथा च धूमत्वा
वछेदेन निश्चितस्य वह्न्यसमवहिताजन्यत्वस्य व्यतिरेको धूमत्वसामानाधिकरण्येना
पादनीयइत्यर्थः अतएव प्रकृतेमताभेदः प्रकृतेमते धूमत्वसामानाधिकरण्येन निश्चित

भवानं-टी
३९ स्यवह्न्यसमवहितताजन्यत्वस्यव्यतिरेकस्यधूमत्वसामानाधिकरण्येनापादनीयत्वात्तानु
धूमत्वावच्छिन्नस्यापादनीयइत्यन्वयेनधूमत्वावच्छेदेनापादनीयइत्यर्थः तद्धर्मावच्छेदेना
पत्तेस्तत्सामानाधिकरण्यमात्रविषयकापादकसंशयाविरोधितया तादृशापत्तेरकिंचि
त्करत्वात् धूमत्वावच्छेदेनवह्न्यसमवहितताजन्यत्वनिश्चयस्यसुघटतावत्तत्रेत्यादिग्रंथवि
रोधपादितेतिमनसि वस्तुतस्त्वित्यस्यास्योपपत्तिरितिनवीनैरुक्तंतदपिचिंत्यं यथावच्छिन्नविष
यकबोधत्वमवच्छेदकावच्छेदेनबोधत्वं यत्किंचिद्व्यक्तिविषयकबोधत्वंसामानाधिकर
ण्येनबोधत्वमितिप्राचीनमतेन्वयव्यतिरेकाभ्यांतद्धर्मावच्छेदेनापाद्यव्यतिरेकनि श्च
यजनकायास्तद्धर्मावच्छेदेनापत्तेस्तद्धर्मसामानाधिकरण्यमात्रविषयकापादकसंश राम
यविरोधितायाअनुभवसिद्धायाउपपादकत्वेनतादृशापत्तेरकिंचित्करत्वाभावात् धू ३९
मत्वसामानाधिकरण्येनपक्ष्यतेधूमत्वसामानाधिकरण्येनवह्न्यसमवहितताजन्यत्व
निश्चयस्यैवप्रदर्शितोचितत्वेनधूमत्वावच्छेदेनवह्न्यसमवहितताजन्यत्वनिश्चयप्रदर्शना

नोविरुद्धेति यथोक्तमेव सम्यक् । अनुकूले जन्यो न स्यादित्यत्र जन्ये व्यभिचारवारकस्य
विशेष्यस्य तथा निविष्टस्वजन्यत्वस्वजन्यत्वविशिष्टस्येति विशेषणे तद्व्यावर्त्यं निर्दिशन्
न आह । अग्रे इत्यादि । परामर्शविषयमिति तच्छेदेन पूर्वोपस्थितविशेष्यस्यैव परामर्शवि
ति भावः । तदेव । वह्न्यसमवहितत्वाजन्यत्वमेव यथाश्रुतेति यथाश्रुतत्वं च वह्निसमवधाना
भाववत्सामान्यजन्यत्वरूपं तत् । निरास इति प्राकृतप्रसिद्धेरित्युक्तरीत्या तद्विवक्षाया
संभवादिति भावः । ननु धूमत्वावच्छेदेन वह्न्यसमवहितत्वाजन्यत्वस्य दुर्ग्रहत्वात्तथाका
र्यं धूमत्वावच्छेदेन पक्षत्वमत आह दीधितौ तत्र चेति । व्याख्यायां संबंधान्तरेणेति ।
तृतीयार्थोऽभेदः वह्निप्रयुक्तेत्यत्र योगेऽन्वेति । वह्निप्रयुक्तेति वह्निसमवहितत्वमर्थः एव
मग्रेऽपि कलापप्रयोज्यत्वेति पाठः वह्निव्यतिरेकेति वह्निव्यतिरेको यत्रेति सुसमता
वह्न्यसमवहितत्वमर्थः एवमग्रेऽपि तेन । संबंधेन । धूमजनकताघटकसंबंधेन । दी
धितौ जन्यत्वग्रहेण प्रयोज्यत्वग्रहेण तर्कपूर्वं जन्यत्वग्रहे तर्कवैयर्थ्यात् असंभ

भवानं·दी·

५० वाद्व्याख्यायां वन्हिव्यतिरेकेत्ति तथाच दीधितौ व्यतिरेकशंकाया इत्यस्य वन्ह्यसमवहि
त जन्यत्वशंकाया इत्यर्थः दीधितौ निरासादृयोगादृयनयादिति यंथम्यं तत्र यस्य विशेषद
र्शनविधया प्रतिबंधादित्यर्थः आख्यायां अन्यथासिद्धत्वशंकया । अन्यथासिद्धवन्हि
संनिधिकत्वशंकया । जनकत्वेत्ति धूमजनकत्वेत्यर्थः धूमे जन्यत्वेति पाठस्तु शंक
याचेति । उभयथापि धूमत्वसामानाधिकरण्येन वन्ह्यसमवहितजन्यत्वकोटिक
शंकायां पर्यवसानमिति भावः दीधितौ । धूमजनकत्वसंदेहस्य चेति धूमे वन्ह्यस
मवहितात्दृशस्य धूमजन्यत्वसंदेहस्य चेत्यर्थः निरुक्तान्यथासिद्धत्वशंकाया अ
त्रैव पर्यवसानादिति भावः । व्याख्यायां वन्हिधूमेति वन्ह्यसमवहितेत्यर्थः । दीधि
तौ धूमानुत्पादृदर्शनेनैवानुत्पत्तिवेघतया धूमे वन्ह्यसमवहितत्वस्याविधस
हकालीनानुत्पत्तिकत्वनिश्चयेनैवेत्यर्थः इतरत्र वन्हिभिन्नं । आसाद्य । सहका
रितया प्राप्य । अत्र त्वाप्नोर्योग्यतया जनकत्वेनेति न तु संभावनायामिति ध्येयं ते न

राम ५०

जनकत्वस्यसंभावनायाइतिपाठः।स्वार्थे।जिनधात्वर्थान्वयीनतुसंभावनायामितिसूचनाय
जनकत्वस्येत्यसमस्तमुक्तमितिनवीनोक्तमुपेक्ष्यं।व्याख्यायांधूमजनकत्वसंभावनायाऽ
धूमेक्वचिद्वह्निंक्वचिद्वेतरत्साधनताद्रशासमूहअन्यत्वशंकायाः विकल्पेनजनकत्वशंका
या अत्रैवपर्यवसानादितिभावः दीधितौक्वचिदितिवह्निंविनाऽर्द्रेन्धनादिसमूहाद्धूमानु
त्पत्तिदर्शनस्यतत्त्वइत्यर्थः अवधृतस्यनिश्चितस्य।वह्निविरहस्यैवेति।एवकारेणवह्निभि
न्नविरहव्यवच्छेदः व्याख्यायांकारणंतरेतिआर्द्रेन्धनादीत्यर्थः।तत्प्रयोजकत्वंधूमानुत्प
त्तिसामान्यप्रयोजकत्वं।नघटतइतिउक्तस्थलेधूमानुत्पत्तिप्रयोजकत्वस्याऽर्द्रेन्धनाद्यभा
वएवसत्त्वादितिभावः दीधितौप्रयोजकत्वनिर्णयेन।तुल्यवित्तिवेद्यतयावह्निविरहप्रयो
ज्यानुत्पत्तिकत्वनिर्णयेन व्याख्यायांतदुपादानपदस्य।तदुपादानमेवशंकाप्रतिबंधकमि
तिमूलस्यतदुपादानपदस्यनिर्णयं।तादृशनिर्णयतात्पर्यकत्वंप्रतिपादयितुमितिप्रा
गुक्तान्वयव्यतिरेकानुविधायित्वज्ञानस्यधूमत्वावच्छेदेनासंभवेनतदवच्छेदेनशंकाविर्री

भवानं.टी.
४१
५१

धित्वासंभवादितिभावः प्रथमतएव। तद्विवरणरूपं वन्हेरुपादानं नियमतः कुर्यादिति प्रथमं
वाक्यमेव। तथा। तादृशनिर्णयतात्पर्यकतया व्याचष्ट इति। विवरणविधिप्रमाणवाक्ययो
रेकार्थतात्पर्यकत्वादितिभावः यथाश्रुतेति। वह्निपदस्य वह्निसमवहितार्थकत्वमनादृत्य
वन्ह्यर्थकत्वेतु विवक्षितार्थे ति। तादृशनिर्णयतात्पर्यकत्वे त्यर्थः बाधितं चेति धर्मार्यवह्निभि
न्नाइंधनादेरुपादानादितिभावः अत्रच सीधितो वन्हेरित्यादिस्तात्पर्यमित्यंत एको ग्रंथः न
तु वन्हेरित्याद्युपादानमित्यंत अत्रचेत्यादितात्पर्यमित्यंतस्तु भिन्नो ग्रंथस्तथासत्युपा
दानमित्यस्योद्देकं न वैयर्थ्यमात्रचेत्यनेन व्याख्येयग्रंथानुद्देकनेन चाल्पकतापत्तेरिति
ध्येयं। उपादानमित्यस्य व्यवहितेन तथा यो जनाप्रदर्शनायाह सीधितानुपादानमिति। अत्रच राम
वन्हेरित्यादिवाक्ये सप्तम्यर्थे सप्तमी अस्य च तात्पर्यमित्यत्रान्वयः व्याख्यायां नियमाधी ४१
नेति वन्हेरुपादानं नियमतइत्यत्र योजनाल्लभ्यमेव वन्हेर्नियमतउपादानमित्यत्र वह्नि
समवहितार्थकवह्निपदोपादानपदयोरं तर्निविष्टेवकारसमानार्थकनियमपदार्थे

नियमाधीनत्वस्यावच्छेदकबोधे संभवादिति भावः यद्यपि अवच्छेदकबोधस्य नियमपदा
धीनत्वमेव संभवति तथापि विषयाबाधेन प्रमात्वस्य वचनाय तथोक्तिः अथवा नियम
पदाधीनत्वमेव नियमाधीनत्वं विवक्षितं असंगतेः वह्निसमवहितानुपादाने नियमस्यावच्छे
दकत्वोक्तेरसंगतेः अवच्छेदप्रतियोगित्वरूपस्यावच्छेदकत्वस्य तत्रासंभवादिति भावः कुर्यादिति
इत्यत्र सप्तम्यर्थो घटकत्वं कथमित्यत्रान्वयि । अवच्छेदकस्य । आद्येत्यस्य यथाश्रुते उक्तरी
त्यासंगतेः परीहाराय । कश्चिदिति उदाहरणमत्रास्वरसः । वह्निसमवहिताजन्यत्वनिश्च
यइति । यद्यप्यहेतुकएवोत्पत्स्यत इति शंका न वह्निसमवहिताजन्यत्वनिश्चयनिवर्त्या तथा
पितदजनकत्वज्ञाने इत्यस्य हेतुजन्यत्वविशिष्टस्य वह्निसमवहिताजन्यत्वस्य ज्ञाने इत्यर्थ
करणमत्रेति ध्येयं । दीधितौ प्रयोजकइत्यं तेन शाक्यसंबंधोपदर्शनं तथा च वह्नि
समवहितानुपादानार्थकस्य नियमपदस्य स्वार्थप्रयोजकतदजन्यत्वज्ञाने लक्षणेति भा
वः । आख्यायां नियमपदार्थस्येति नियमपदं नियमपदसमानार्थकपदमेवकारस्तादर्थ्य
स्येत्यर्थः तदुपादानमेवेत्यत्र योजनालभ्ये तस्यैवोपादानमित्यत्र वह्निसमवहितार्थक

भवा-टी
५२ तस्यैतोपादानपदयोरंतर्भि। विद्धनियमार्थकपदे एवकारार्थशंकाप्रतिबंधकत्वस्यान्वयायोगा
दिति भावः। तथा चेति तद्विवरणरूपवन्हेरित्यादिवाक्येपि तद्भूपरणयानियमपदार्थे तदज
न्यत्वज्ञाने तात्पर्यविषयोपादकमिति शेषः। तद्वाक्ये इति नियमपदशाक्ये तात्पर्यः अप्रकृतमिति
विवरणवाक्यविध्रियमाणवाक्ययोरेकतात्पर्यकतया विध्रियमाणवाक्ये नियमपदार्थता
त्पर्याभावे विवरणवाक्येपि तदसंभवादिति भावः आह। उपादानपदार्थे तद्भूरणपातद
जन्यत्वज्ञाने तात्पर्यविषयोपादकमुपादानपदशाक्यसंबंधमाह। दीधितौ तात्पर्यमिति तथा
च तदुपादानमित्यादि वाक्यस्याप्युपदर्शित एव तात्पर्यमित्यर्थः तएव लभ्यते इत्याशयः। कि
चित्तु उपादानमित्यं तस्तत्पर्यमित्यं तमब्रुमिन्नएवयं धः उपादानमिति उपादानमित्यनेनान्व राम ५२
यइत्यर्थः तथा च वन्हिसम्बंधितस्य नियमत उपादानं कथं कुर्यादिति वन्हेरित्यादि मूलार्थ इति भा
वः। ननु प्रथमप्रतीकमूलस्यैव तदर्थकरणेऽग्रे तदुपादानमित्यनेन वन्हिसमवहिताजन्यत्वनिर्णय
लाभः कथं भवेत्तत्राह अग्रेति वन्हेर्नियमत उपादानमिति वाक्यमिदमोर्थः सप्तम्यर्थो घटकत्वं त
स्य नियम इत्यनेनान्वयः प्रयोजके इति तथा च एवकारस्य तदजन्यत्वज्ञाने तद्भूपरणेति भावः तस्यै

वोपादानमित्यंतं निर्विशेषणकारार्थेशंकाप्रतिबंधकत्वस्यान्वयायोगादुपादानपदस्यैव तत्र लक्षणा
वाच्येत्याशयेनाह। परंपरयेति तात्पर्यं तदुपादानमित्यादिमूलग्रंथस्य तात्पर्यविशेषं पूर्व
वदित्याहुः। ननु पूर्वोपदर्शितशंकानिवृत्तिरापाद्यव्यतिरेकनिर्णयमुद्दया तर्ककारणत्वं न्या
समवहितानुत्पत्त्वं निर्णयार्थमपेक्ष्यते न तु साहाय्यादेर्वतर्कोपि तादृशशंकानिवृत्तिश्च य
दि तादृशनिर्णयमपेक्ष्यते तदा अन्योन्याश्रयः किंच पूर्वतत्रोक्तन्यायेनेत्यादिनाग्रन्थस्यै
व तादृशनिर्णयविरोधितादृशशंकानिवर्त्तकत्वाभिधाने नेदानीं तादृशनिर्णयस्य
तादृशशंकानिवर्त्तकत्वाभिधानेन संदर्भविरोधोऽपि दुर्वार एवेति चेत् अत्र केचित् पूर्वतत्रोक्त
न्यायेनेत्यादिग्रन्थस्यैव तादृशनिर्णयविरोधितादृशशंकानिवर्त्तकत्वाभिधानेऽपि इदा
नीं तादृशनिर्णयोत्तरमपि तादृशशंकानोत्पद्यत इत्येतन्निर्वाहाय तादृशनिर्णयस्य
तादृशशंकानिवर्त्तकत्वाभिधानमिति नोक्तदोष इत्याहुः। अपरे तु तादृशनिर्णये
तादृशशंकाप्रतिबंधकत्वस्य वक्ष्यमाणमिश्रमते वस्तुतादृशशंकाविरहे लिंगत्व
रूपतया नोक्तदोष इत्याहुः वस्तुतस्तु दीधितौ तदुज्जन्यज्ञानपदं व्याख्यायामस्मिन्नग्र

भवानंदी ४३ दृढैकवन्ह्यसमवहिताजन्यत्वनिर्णयपदं च नापाद्यप्रतियोगिनीयथाश्रुतवन्ह्यसमवहिता
जन्यत्वस्य निर्णयपरं किंतु पूर्ववृत्ताशंकानिवर्तकत्वेनाभिमतो यो वन्ह्यसमवहितत्वादृशा
43 स्वरूपकालीनानुत्पत्तिकत्वनिश्चयस्तत्परमेव। एवं च वन्ह्यसमवहिताजन्यत्वनिर्णया
धीनतर्कप्रवृत्तेस्तत्रापि निर्णयाधीनत्वं नापाद्यव्यतिरेकनिर्णयविधया तादृशनिर्ण
याधीनत्वं किंतु तादृशानुत्पत्तिकत्वनिश्चयजन्यायास्तादृशशंकानिवृत्तेस्तज्जन्यो य आ
पाद्यप्रतियोगिनीयथाश्रुतवन्ह्यसमवहिताजन्यत्वस्य निर्णयस्तज्जन्यत्वरूपमे
वेति न तदसंगतिः अत एव तादृशनिर्णयजन्यत्वमुपेक्ष्य निर्णयाधीनत्वमुक्तं तथा च
तादृशानुत्पत्तिकत्वनिश्चयेन शंकानिवृत्तावापाद्यप्रतियोगिनो वन्ह्यसमवहिताजन्य राम
त्वस्य निर्णयः सुघट इत्यर्थतो लभ्यते। यद्वापाद्यप्रतियोगिनो निर्णयपरमेव तत्र जन्य ४३
त्वज्ञानादिपदं तात्पर्यमित्यस्योपादानपदस्य लक्षणया तादृशनिर्णये तात्पर्यं शंका
प्रतिबंधार्थमिति नार्थः किंतु करणमुत्पत्त्योपादानपदशक्यस्य तादृशानुत्पत्तिकत्व
निश्चयस्य शंकाप्रतिबंधकत्वं शक्तो लभ्यते एवं च शंकाप्रतिबंधे वृत्ते तादृशनिर्णयो

पि सुघट इत्याशयेनोपादानपदस्य तत्फलयाता तादृशनिर्णये तात्पर्यमिति तथा च पूर्वस्य यदुक्तं
तादृशनिर्णयस्य सुघटत्वं मूलतोव्यस्थर तात्पर्याभ्यां लभ्यत इत्यत्रैतद्ग्रन्थस्य तात्पर्यमिति
नोक्तदोषसंभावनापीति प्रतिभाति अन्वयेतिवन्हीत्यादिः अनुविधायित्वस्य ज्ञानमेव धू
मविशेष्यकानुविधायित्वनिश्चय एव । अग्रेतदेवेति तच्छब्देनानुविधायित्वपरामर्शार्थमनु
विधायित्वज्ञानमेवेति समस्तस्यार्थः शंकाप्रतिबंधकं । शंकाप्रतिबंधकतयावश्यमभ्यु
पेयं । इदं च वक्ष्यमाणतर्कजनकाबाधव्यतिरेकनिर्णयस्यावश्यकत्वद्योतनायोक्तं त
देवेति तथाचेत्यादिः तर्कघटकं आबाधकोटिप्रतियोगितया तर्कघटकं तदभावबा
धक एव तर्क इति यावत् एवं च मूले वन्हेरिति वन्हिपदं यथाश्रुतमेव । उपादानपदं च
करणव्युत्पत्त्या तादृशानुविधायित्वज्ञानपरमिति ध्येयं तथा च वन्ह्यसमवहिताजन्य
त्वस्य तर्कघटकत्वमतेपि तादृशानुविधायित्वनिर्णयस्यावश्यकतया तादात्म्यकाबाध
व्यतिरेकनिर्णयजन्यतर्कस्य तादृशानुविधायित्वाभावबाधकत्वमतेपि तादृशानुविधा

यित्वनिर्णयस्यावश्यकतया तत्तत्स्मरणकाद्यन्वयव्यतिरेकनिर्णयजन्यतर्कस्य तादृशानुविधायित्वाभा
वाबाधकत्वमेव युक्तमिति भावः इत्याशयेनाह व्याख्यायां विशेषदर्शनतयेत्यादि। एतेन एतन्म
ते तर्के तादृशानुविधायित्वाभावाबाधकत्वमेव युक्तमिति भावः इत्याशयेनाह व्याख्यायां विशे
षदर्शनतयेत्यादि। एतेन एतन्मते तर्के तादृशानुविधायित्वाभावस्यैवाबाधकतया तत्सशंकाप्र
तिबंधस्यैव प्रकृतोपयोगेन वह्न्यसमवहितत्व जन्यत्वशंकाप्रतिबंधस्य प्रकृतानुपयोगितयाव
ह्न्यसमवहितत्व जन्यत्वशंकाप्रतिबंधकमिति व्याख्याग्रंथे दूषयित्वा विशेषदर्शनतया विपरीत
निश्चयतयाशंकेति अन्वयव्यतिरेकानुविधायित्वशंकेत्यर्थ इति केषांचिद्व्याख्यानं परास्तं। उ
क्ताशयेन व्याख्याग्रंथे दूषणाभावात् विपरीतनिश्चयतयेति व्याख्याने विशेषदर्शनतयेत्य
त्र स्वारस्याभावात् तादृशानुविधायित्वशंकानिवृत्तौ तन्निश्चयस्तन्निश्चये तच्छंकानिवृत्तिरित्य
न्योन्याश्रयात् ॥ केचित्तु दीधितौ तदेव तद्यत्तर्कघटकं उपनयवशात्तर्कविषयः तथा च शंका
निरासकतर्कज्ञानस्यापि स्मृतत्वमपि इति भावः तर्काकारस्तु प्रागुक्त एवेत्याहुः। अन्ये तु तदेव तादृशा

नुविधायित्वज्ञानमेव तर्कघटकं शंकाप्रतिबंधद्वाराप्रयुक्तं तर्कसंपादकमिति वदंति तदुभयमप्य
सत्। उक्ताभेदसंपादकत्वादिति वक्ष्यमाणसंगतेस्सदृश्यरत्वात् अन्वयादीति आदिना व्य
तिरेकपरिग्रहः। इत्यपि अपर्यवसानेइतिक्रमेणोक्तव्याप्तिद्वयानुसारेणैतत्तर्कद्वयपर्यव
सानइत्यर्थः अन्वयांशस्य। नियतान्वयांशस्य। वह्न्यसमवहितानाजन्यत्वरवेति जन्यत्ववि
शिष्टेत्यादिः जन्यत्वस्याकारणादित्येतद्वलाभादितिभावः। नियतस्येतीति नियतस्येत्यादे
रर्थः केचित्तु वह्निसत्वेइतरसामग्रीसत्वेऽस्य धूमानुत्पत्तिरन्वयः इति नियतान्वयस्तत्रसएव वह्निज
न्यत्वं धूमत्वावच्छेदेनतद्व्यतिरेकेणतर्कप्रवेशमिति जन्यत्वमेव नियतान्वयः नियतव्यतिरेकश्चत
दसमवधानेइतरसामग्रीसत्वेनुत्पन्नत्वं तदसमवहितेतत्सामग्र्यजन्यत्वमिति यावत्। तथा
च जन्यत्वविशिष्टवह्न्यसमवहितताजन्यत्वएवपर्यवसानान्नपुनरुक्तपक्षाभेदइत्याह। निय
तस्यचेत्यादीतिप्राहुः। ननुकार्यकारणभावग्राहकतर्कस्यापिवह्निजन्यत्वनिर्णयद्वाराधू
मोपदियवह्निव्यभिचारीस्यान्नत्ववह्निजन्योनस्यादितितर्कान्तरसंपादकत्वेनतद्द्वाराव्यभि

भवानं.टी.
८५ चारशंकानिराकरणे प्रयोजितया न वैयर्थ्यं उपायस्योपायांतरादूषकत्वादित्यत आह किंचेति

ऽधिजो केचिद्विति। एतन्मते मूलेवन्त्युपासनपरे पथाश्रुतवह्निप्रवृत्तिपरे। न चैवं प्रवृत्तेः

कारणताग्रहोत्तरकालीनत्वेन प्रागुपदर्शितरीत्यान्योन्याश्रय इति वाच्यं। अन्वयव्यतिरेक

५८ ग्रहेण कोघवनुपस्थित्यादिना वा कारणतानिश्चयविरोधिशंकाविरहे कारणतानिश्चये न प्रत्य

हो सत्यां ततः शंकानिवृत्त्या तर्कसंभवेनान्योन्याश्रयाभावात्। अयं तर्को विनैव कारणतानि

श्चये संबंधेन मूलोक्ततर्कवैयर्थ्यं तदर्थमेव तर्कानुसरणमिति चेन्मैवं। सामान्यतः कारण

तानिश्चयेपि संयोगेन वह्निजन्यत्वानिश्चये संयोगेन व्यभिचारसंशयानिवृत्तौ तेन संबंधेन

व्याप्तिग्रहासंभव इति संयोगेन व्यभिचारसंशयनिरासद्वारा संयोगेन वह्निनिरूपितधूम रामः

निष्ठव्याप्तिग्रहोपयिकोयं संयोगेन वह्निव्यभिचारित्वापादकक संयोगेन वह्निजन्यत्वा ८५

भावापादकस्तर्कः धूमो यदि संयोगेन वह्निव्यभिचारी स्यात्तर्हि संयोगेन वह्निजन्यो न स्यादि

त्याकारकस्तर्कस्त ज्ञानकापादकव्यतिरेकनिर्णयात्मकसंयोगेन वह्निजन्यत्वनिश्चयसंपा

दकूतयाम्कत्तो क्ततर्कसाफल्यकत्वात् । कार्यकारणभावग्रहानंतरं । सामान्यतो वह्निजन्यत्वनि
र्णयानंतरं व्याप्तिग्रहायेति अथ तर्क इत्यनेनान्वेति व्याख्यायां वह्निव्यभिचारीत्तिसंयो
गे नेत्यादिः सामानाधिकरण्यप्रत्यासत्त्या । तद्घटकसंयोगेन एवमग्रेपि व्याप्तिग्रहस्तर्केति ।
मूलोक्ततर्कस्य संयोगेन वह्निजन्यत्वनिश्चये आपाद्यव्यतिरेकनिर्णयसंपन्नो व्याप्तिग्राहक
तर्कावलम्बनादिति भावः । ननु सामान्यतः कारणतानिश्चयवत्तर्के विशेषसंयोगेन वह्निजन्य
त्वनिश्चयः स्यादत आह धूमधीधी तो व्यधिकरणस्येति । ननु व्यधिकरणस्य जनकशंकायाश्च आ
भावान्नवगाहि तयासंयोगेन वह्निजन्यत्वनिश्चयाविरोधितया न तन्निरासार्थेऽपेक्ष्यत अत आ
ह व्याख्यायां व्यधिकरणस्य जनकत्वपर्यवसायिनीति तन्निरासार्थमिति । संयोगेन वह्नि
जन्यत्वाभावशंकायास्तन्निश्चयविरोधितया तन्निरासस्यावश्यकत्वादिति भावः । नन्वेव
मपि सामान्यतः कारणतानिश्चयविरोधिशंकावत्संयोगेन वह्निजन्यत्वनिश्चयविरोधि
शंकायापि प्रकारान्तरेण कोट्यनुपस्थित्यादिना निरासंभवात्तर्कवैयर्थ्यं दुर्वारमेवेति वाच्यं
यत्रोक्तशंकायाः प्रकारान्तरेण न निरासस्तत्रैवतत्तर्कसाफल्यम् यात् अत आह क एवेति ए

भवानं॰ दी॰ ४६

वं च विपर्यये तत्कोटिमात्रपर्यवसानाय पक्षे सत्वं तं निवेशनीयमिति ध्येयं। निष्कर्ष इति प्रागुप
दर्शितयुक्त्येत्यादिः दीधितौ सामानाधिकरण्यातिरिक्तेति सामानाधिकरण्यघटकातिरि
क्त इत्यर्थः संयोगातिरिक्तेनेति यावत्। सामानाधिकरण्येनेति तद्घटकेत्यर्थः संयोगेनेति या
वत्। व्याख्यायां स्वव्यधिकरणेति अनेन सामानाधिकरण्यातिरिक्तप्रत्यासत्त्या वह्निम
त्वं सूचितं। स्वावयवजन्यत्वादिति तथा च यथाश्रुतमूलानुरोधे पक्षधर्माविशेषणसिद्धि
र्निष्कर्षे चापाद्यप्रतियोग्यसिद्धिरिति भावः। उक्तन्यायेनेति विशेषणत्वेन भिन्नतो विशिष्टा
भावसिद्धेर्विशिष्टाभावसाध्यपर्यवसायितेत्युक्तयुक्त्येत्यर्थः विशिष्टाभावसिद्धिरितीदं च य
थाश्रुतमूलानुरोधेनेदमुपलक्षणं निष्कर्षेपि पक्षे आपाद्यप्रतियोगिसिद्धावेतत्कप्रवृत्ते
रिति द्रष्टव्यं। तत्सत्वं तत्संयुक्तसंयोगादीति आदिना तादात्म्यादिपरिग्रहः तादृशजन्यत
तिसंयोगातिरिक्तसंबंधेन वह्निजन्यत्वेत्यर्थः। तन्निरूपणीयार्थं अनुमानिकतादृशजन्यत्व नि
रूपणार्थं। दीधितौ ग्राह्यं अनुमेयं अत्रेदमवधेयं। एतन्मते मूले आपादके असमवायित्वप
द संयोगातिरिक्तसंबंधघटितपरं जन्यपदद्वयं च जन्यतावत्परं तदेकदेशजन्यतायां च

राम ४६

निरुक्तसमव्याहृतपदार्थयोरभेदान्वयः। एकदेशान्वयासहिष्णुतायां तु जन्यपदद्वयमेवतादृ
विशिष्टार्थे लाक्षणिकं पदांतरं तु तात्पर्यग्राहकं एवमापद्येजन्यपदं वन्हि जन्यपरं अवच्छे
रित्यादिशंकाद्वयं वन्हिपदस्य वन्हिसंयोगपरतयासंयोगातिरिक्तसंबंधेन वन्ह्यजन्यत्वकोटि
कसंशयपर्यवसन्नं भेदः प्रागिवपर्यायाश्रुतत्वात् नुरोधेपक्ष्याविशेषणसिद्धिविरोधितया
निष्कर्षेऽध्यापत्तिपर्यवसन्नतयाप्रकृततर्कविरोधि अहेतुकएवोत्पत्स्यतइतिशंकातु प्रागुक्तरीत्या
आपादकाद्यप्रसिद्धिपर्यवसायिनी। यत्तु एतन्मतेअवच्छेदेवेत्यस्यवन्हिभिन्नादेवेत्यर्थः त
थाच तादृशशंकाधिकतीयशंका चसामान्यतोवन्ह्यजन्यत्वकोटिकेवतस्याः प्रकृततर्केइष्टा
पत्तिविधयाप्रकृततर्कविरोधित्वमितितन्निरस्तं। कार्यकारणभावग्रहानंतरमेवैतत्तर्कप्रवृत्त्या
तर्कपूर्वमेवोक्तशंकायाः सामान्यतोवन्हिजन्यत्वनिश्चयेनतदुक्तरीत्यातस्याविरोधित्वासं
भवादितिमास्थापयं पर्यालोचनेनेति। कारणसंबंधाभावस्यैवकार्यानुत्पत्तिप्रयोजकता
दितिभावः। अयमत्रापिमतद्वयेपि निधिनोवाचोभंगया। शब्दभेदेन परेस्तार्थभेदः परिष्का

रं स्फुरत्यतिव्याख्यायां तत्रेति। दीधितौ वन्ह्यनधिकरणदेशानुत्पत्तिकत्वे सति वन्हिसंयोगा
भावप्रयुक्तानुत्पत्तिकत्वे सति वन्ह्यधिकरणदेशोत्पत्तिकः वन्हिसंयोगप्रयुक्तोत्पत्तिकः जन्यो
न स्यात् इतीति शेषः इदं च वा चो भंग्येत्यत्रा भेदेनान्वयि व्याख्यायां तदर्थं धूमत्वावच्छेदेन
तादृशानुत्पत्तिकत्वग्रहार्थं। दीधितौ तादृशानुत्पत्तिकत्वग्रहस्य संयोगेन वन्ह्यनधिकरण
देशानुत्पत्तिकत्वनिर्णयस्य धूमेति। एतद्धूमेत्यर्थः। वन्हिसंबंधाभावस्य। वन्हिसंबंधप्रति
योगिकाभावस्य। आद्ये। प्रथमाद्ये व्याख्यायां। आद्यकार्यानुत्पत्तेः कारणसंबंधाभावप्र
युक्तत्वादित्याशयः संबंधांतरस्य परंपरासंबंधादेः गोरवाच्चेति। उपस्थितत्वेपीत्यादिः
शरीरगौरवाच्चेत्यर्थः दीधितेस्तथात्वेति धूमत्वावच्छिन्नानुत्पत्तिं प्रतीत्यादि। एतन्मते धूमो 
दिसंयोगेन वन्हिव्यभिचारी स्यात् वन्ह्यधिकरणदेशोत्पत्तिको न स्यादिति व्याप्तिग्राहकतर्का
वतारस्य मूलोक्ततर्कः एवमवन्हेरित्यादिशंकाद्वयं वन्हिशब्दस्य वन्हिसंयोगपरतया यं च
भीविनापहो तरविभक्त्योः प्रयुक्तत्वपरतया वन्हिसंयोगाभावप्रयुक्तोत्पत्तिकत्वकोटिकसं

शापपर्यवसन्नं शेषं पूर्ववदिति ध्येयं। ग्राख्यायां तथाग्रहे सामानाधिकरण्यातिरिक्तप्रत्यासत्त्या
वन्ह्यजन्यत्वस्य वन्ह्यनधिकरणदेशावृत्त्युत्पत्तिकत्वस्य च ग्रहे। वह्निजन्यइति न स्यादित्यग्रि
मेणान्वयः। परिष्काराभिप्रायेणाह वन्ह्यनधिकरणेति। वैयर्थ्यमिति। तथा च लाघवग्रहोप
योग्येपि तर्कस्यापि वैयर्थ्यमिति भावः। धूमत्वावच्छेदेन प्रथममेव तथाग्रहाभावमभिप्रे
त्याह प्रथममेवेति विशेषान्वयव्यतिरेकग्रहस्य सामान्यव्यभिचारानिर्णयादिरूपसहकारि
लाघवप्रतिसंधानादिवशात्सामान्यधर्मावच्छेदेन जन्यत्वग्राहकत्वं न तु यत्किंचिद्ग्राहकत्व
मिति वक्ष्यमाणरीत्या वन्ह्यधिकरणदेशोत्पत्तिकत्वग्राहकवन्हिजन्यत्वाग्राहकतर्काभिप्रा
यके द्वितीयेऽसंभवेन प्रथममेवेत्युक्तं सामान्येति यदुक्तं विशेषस्यादिः। तादृशजन्यत्वग्रहे वत्व
यापि सामानाधिकरण्यप्रत्यासत्त्या वन्हिजन्यत्वग्रहोपगमे च। यथाश्रुतमेवेति तर्कस्ये
त्यादिः। यथाश्रुतत्वमेवेत्यर्थः। प्रत्यासत्तीति प्रत्यासत्त्यादीत्यर्थः। ननु तर्कस्य यथाश्रुतत्वे
वैयर्थ्यमेव स्यात् ऽङ्गीकृत्यैव तादृशजन्यत्वग्रहादत आह सामान्येति। स्वयमपि लघूपायि।
अवश्येति प्रकृतव्याप्तिग्रहोपयोगायेत्यादि तथा च यत्रोभयोरिति न्यायेन दोषपरिहार

योः सामग्र्येकिं तादृशाप्रत्यासत्त्यादिनिवेशप्रयुक्तगौरवसहिष्णुतयेति भावः अपूर्वोक्तदिशा
कार्यकारणभावग्रहस्य वक्ष्यामि ग्रहतया कार्यकारणभावग्रहानंतरं व्याप्तिग्रहायेत्स्यादि
त्याह तत्र तर्कानुसरणे प्रयासोऽनुचित इति प्रथमपक्षे ती पक्षाधारणं दूषणं तरमपि बोध्यं ॥ उ
भासान पदस्य व्याख्या प्रत्यक्षवृत्त्यर्थकत्वं प्रकारांतरेण वर्णयतां मिश्राणां मतमाह दीधिते
मिश्रास्त्विति व्याख्यायां तर्कांतरेति धूमो यदि वह्निव्यभिचारी स्यात् दिति जन्यो न स्यादिति
तर्कांतरेत्यर्थः। लाघवतादृशोत्तेजकविधयावेति इष्टापत्तिशंकेति अवन्हेरित्यादिपदां के
त्यर्थः। दीधितेरशंकोऽप्यव कल्पेति अवन्हेरवेत्यादिग्रंथेनेत्यादिः व्याघातोऽपेनु पत्तिः उ
पदर्शनेत इति सर्वत्र स्वक्रियाव्याघात इत्यादिग्रंथेनेत्यादिः तथासति। न च शंकावत्त्वे राम
सातितत्र तत्कापर्येति। धूमादिकार्य इत्यर्थः। तत्र तत्र धूमादिकार्ये संप्रत्ययो निरूपितत्वं ५८
तस्य च कारणपदार्थैकदेशाकारणत्वेऽन्वयः व्याहत्येन। अनुपपत्तेः स्फुः तादृशशं
काभिरितिशेषः प्रवृत्ता विशिष्टसाधनतानिश्चयस्य हेतुत्वादिति भावः। व्याख्यायांत
त्रेतिशंकासत्त्वे प्रवृत्त्यनुपपत्तावित्यर्थः। बाधादिति प्रवृत्तेः शंकाप्रतिबंधकत्वाभावा

दित्तिभावः। सैव प्रतिबंधकपदस्य यथाश्रुतार्थकत्वारस्यस्य प्रयुक्तैव। असंगतिरपकर्षः। तथा
यथाश्रुतार्थत्यागस्यैवेति प्रतिबंधकपदस्य यथाश्रुतार्थत्यागाभावस्योत्कर्षः अन्वयव्यतिरे
काभ्यां मणिमंत्रादिन्यायेन प्रवृत्तेः शंकाप्रतिबंधकत्वोपगमादिति भावः। क्वचिद्यथा
श्रुतार्थत्यागस्यैवेत्येव पाठः स तु सुगम एव टीधितौ आहुरित्यत्राहुरित्यनेन तन्मते संभावना
याएव प्रवृत्तिहेतुतया इष्टसाधनतानिश्चयाभावेपि तत्संभावनया प्रवृत्तिर्निर्वाहिता न चाति
प्र६ व्याप्तेः प्रवृत्तिमभिप्रेत्यैव तदुक्तमिति वाच्यं। तस्माद्वा सिद्धेरिष्टसाधनतासंसर्गग्रहादेव वा
तत्सिद्धेरित्यस्वरसः सूचितः व्याख्यायां तच्चैवेति व्यभिचारनिश्चये शाब्दानुमित्योरप्यनुप
पादिति भावः। अहेतुत्वमिति तेन विनापीति मूलोक्तमिति शेषः दर्शयति उपपादयति। न
व्याप्तेस्तु तेन विनापीति मूलं यदि व्यभिचारनिश्चयस्थलपरं तदा असंगतिः। तत्र व्याप्ति
धीमात्रानुत्पादात्। तः संदेहस्थलपरतया तदुपपत्तेर्व्याचष्टे। योग्यतादीत्याहुस्तद्वितीयं
पूर्वग्रंथं व्याख्यायैवोत्तरग्रंथव्याख्यानस्य संप्रदायसिद्धतया तेन विनापीत्युत्तरग्रंथं

व्याख्याय मतांतरत्वेन तर्कस्वरूपमित्यादिना तद्वेत्यादिः पूर्वग्रंथव्याख्याने संदर्भविरोधापत्तेः
व्यभिचारे स्येति। व्याघातेन कोप्यनुपस्थित्यादिना वायत्रस्वतएव व्यभिचारशंकाविरह
स्तत्र व्यभिचाराद्युक्तिर्भावः। ननु तर्कस्याप्रमात्वनियमेन तर्कस्य सत्ताभासत्वेन प्रमात्वा
प्रमात्वरूपे किंतु व्याप्तिप्रमाभ्रमजन्यत्वरूपे इति सत्तर्कादित्यादिमूलाभिप्रायं दूषयित्वाभि
प्रायांतरं वक्तुमाह। दीधितौ नन्विति। तर्काभासाद् व्याप्तिभ्रमजन्यतर्काद् व्यभिचार इति
।सत्तर्काभासयोरित्यादिऽभिप्रायांतरमेवाह। तथा चेत्यादिना। बोध्येति। फलीभूत
ज्ञानप्रकारेत्यर्थः। व्याख्यायां तथा चेत्यादिदीधितिपाठयथा पुरुषत्वव्याप्यकरादिमान् पुरुष
इत्यादि इदं उद्देश्योकारादिभ्रमात्मकविशेषदर्शनसत्त्वे पुरुषत्वप्रमाभ्रमयोरुत्पादानुत्पा रात्र ५९
दाभ्यां व्यभिचारेण विशेषदर्शनसत्यत्वासत्यत्वेन प्रमात्वाप्रमात्वरूपे किंतु पुरुषत्व
तदभाववद्विशेष्यकत्वरूपे तथा धूमो यदीत्याद्युक्ततर्काभासत्वे व्याप्तिप्रमाभ्रमयो
रुत्पादानुत्पादाभ्यां व्यभिचारेण तर्कस्य व्याप्तिप्रमाभ्रमजन्यत्वरूपे सत्यत्वासत्यत्वेन

सतर्को दित्यादिमूलस्याभिप्रेते किंतु व्याप्तित्वाभाववद्विशेष्यकत्वरूपे इत्याशयेन लाघवे:
यथाश्रुते वक्ष्यमाणदूषणं दाहदीधितौ तावत्र वेति व्याख्यायां अग्रे पिवीध्यादिमदि
स्यत्रापि प्रमात्वावच्छिन्नेति प्रमात्वघटकेत्यर्थः अनेन धूमो वह्नि व्याप्यो धूलीपटलं
ति समूहालंबनप्रमाशय धूलीपटलेन व्यभिचारः इत्येवमिति इत्युपलक्षणं यत्र
व्याप्तिभ्रमत्वावच्छिन्नं भ्रमत्वघटकविशेष्यतासंबंधेन तत्र व्याप्यभावो व्याप्यभाववा
दिंद्रियसंनिकर्षो वेत्येव वामित्यपि द्रष्टव्यं। तत्प्रमायामिति अलौकिकेत्यादिः व्याप्या
दिप्रमायामित्यर्थः। तस्यव्याख्यादिः दीधितौ बोध्यादिमदिति अत्र बोध्यादि कमुप
लक्षणं। ननु विशेषणं तेन व्याप्यादेरतीतत्वादिदशायां धर्मिणो बोध्यादिमत्त्वाभावे
न नोक्तदोषस्तादवस्थ्यं। संनिकर्षे लौकिका लौकिकसाधारणे संनिकर्षे तेनोक्तस्य
त्वेयत्र धर्मिणोऽतीतत्वादिस्तत्र न हेतुत्वासंभवस्तत्रापि ज्ञानलक्षणया घटलौकिकसं
निकर्षसंभवात्। लाघवादिति प्रथम इत्यादिः व्याख्यायां संयोगे। द्वितीय इत्यादिः। आह

भवानं॰टी॰
५०
50

उभयत्रयुक्तिमाह। दीधितौ स्वयमेवा चिंतामणिकारेणैवदर्शितत्वादितितथाचसामान्य
कारणत्वाभावेसत्तर्कत्वादिनाविशेषकारणत्वमपिनसंभवतीतिभावः। तर्कस्यसा
मान्यरूपेणहेतुत्वंसमर्थयति अर्थेत्यादिना प्रत्यक्षेप्रत्यक्षनिर्णयेएवमग्रेपित
न्निवर्तकत्वेनेति विशेषदर्शनत्वेनहेतुत्वेघृतसंयोगादिनासंशयाघृतरकुंकुमगंधा
दिप्रत्यक्षेव्यभिचारापत्तेरितिभावः। व्याख्यायांव्याप्तिप्रत्यक्षेतन्निर्णयेतर्कस्यापीति
व्यभिचारशंकाप्रतिबंधकतयेच्छाविघटकतयावेत्यादिः। तेनरूपेणव्यभिचारज्ञाननि
वर्तकत्वेन। तस्यापि। तर्कस्यापितथाचतर्कस्यतेनरूपेणसामान्यहेतुतायाः रूपत
यापसामान्ययोरितिन्यायेनव्यभिचारज्ञानोत्तरप्रमात्मकप्रत्यक्षनिर्णयादौ राम
व्यभिचारज्ञाननिवर्तकसत्तर्कत्वादिनाविशेषतोपिहेतुतातर्कस्यावश्यकीतिसत्तर्का ५०
दिस्यादिकृतस्यपथाश्रुतार्थकत्वसंभवेप्यत्रवेत्यादिनातात्पर्यवर्णनमनुचितमिति
भावः कार्यतानवच्छेदकत्वादितीतिआमात्तरउक्तमितिशेषः दीधितौतथापिसामान्य

कारणत्वे सत्यपि। प्रयोजकाद्येवेति निरुक्तसंनिकर्षादिति शेषः। उक्तं चैतत्प्रत्यक्षप्रकरणे दीधि
ताविस्तरादि। इत्तीत्यग्रिमेण ग्रन्थेन। तथा च तत्रैव सन्निकर्षादित्यादिमूलस्यार्थमिति भावः।
मत इति तेन नैयायिकमत इति लभ्यते। तादृशकारणत्वमनंगीकृत्य निर्विकल्पकाभ्यु
पगंतृमीमांसकमते व्यभिचारेण वस्तुमात्रस्य प्रत्यक्षप्रयोजकत्वासंभवादि
दमुक्तं। व्याख्यायां तादृशेति प्रमात्वघटके त्यर्थः। पुरुषत्वाश्रयत्वेति। यत्वतीतादृशव
ती तत्वादिदृशायां पुरुषत्वतदभावाश्रयत्वसंबंधेन पुरुषत्वज्ञानाभावात्प्रमाभ्रम
योरप्रत्यक्षत्वापत्तिरिति नेदं सम्यक् किंतु स्व विषयपुरुषत्वतदभाववद्वृत्ति[illegible]
त्व विषयत्वमेव यथायथं प्रमाभ्रमयोः कारणताघटकसंबंध इति केनचिदुक्तं। तन्न॥
उक्तस्य तत्संबंधघटकस्य पुरुषत्वतदभावाधिकरणस्याभावेन तद्घटितसंबंधेन पुरु
षत्वज्ञानाभावेन तत्वाप्युक्तदोषस्य दुर्वारत्वात्। न च तादृशाधिकरणस्योपलक्षण
तया संबंधघटकताभ्युपगमान्न दोष इति वाच्यं। प्रमाप्युपलक्षणीभूततादृशाश्रयत्वस

भवानं·टी
५१
51

संबंधत्वयोक्तदोषाभावस्यतुल्यत्वात्। अव्याववर्त्तकानीति। अव्यावर्त्तकत्वादीत्यर्थः पुरुषत्व
विशेषणस्य पुरुषसंबंधत्वस्याव्यावर्त्तकत्वादितिभावः। आदिपदेन पुरुषत्वभ्रमदशा
यां वस्तुमस्यापुरुषसंबंधपुरुषत्वज्ञानस्यसत्वेचपुरुषत्वप्रमापत्तिरित्यस्यपरिग्र
हः। कार्यज्ञानवच्छेदकत्वादिति। ऽन्यमितिविशेषः क्वचित्कार्यतानवच्छेदकत्वादित्येवपाठः।
शंकेतिकारणत्वशंकेत्यर्थः एवमग्रेपि। तत्रकार्यकारणभावेअसंगतइतिज्ञानसंबं
वप्रमाणसापेक्षत्वादितिभावः। दीधितौ वनादिसिद्धत्वज्ञानस्यवक्ष्यमाणत्वादनादिसि
द्धकारणताकत्वनिर्वचनस्यव्याख्यायांशंकाप्रतिबंधइतिविशेषदर्शनतयेत्यादिअनु राम
योगस्यप्रश्नस्यअसंभवादितिप्रश्नोत्तरभावविरहादितिभावः इतिग्रंथस्वरसात् ५१
इतिमूलग्रंथानुपपत्तेः परास्तेतीति। एवंचस्वरूपसत्। एवानादिसिद्धत्वस्यप्र
योजकत्वेपिनक्षतिरितिध्येयं। तथासतिप्रमाणप्रश्नासंगतिंपरिहरतितथाचेत्या
दिना। अर्थापत्तित्वादिति। तथाचानुमानत्वादित्यनेनानुमानस्यव्याप्तिग्रहमूलकत्वेन

यद्यनवस्थासाद्व्यस्थापादनंतत्परमतेनसंभवतीतिभावः पक्षेतरत्वस्येतिपक्षेतरत्वेति
शेषः संभवतीतितथाचोक्तस्थलएवपक्षेतरत्वस्योपाधित्वासंभवेनानुमानप्रवृत्त्या
नुमानमात्रोच्छेद इतिभावः अनिश्चितेत्वीतितथाचनीधितावनिश्चितेत्यारभ्यवैफल्या
दित्यंतरकोग्रंथः पक्षेसाध्यनिर्णयेऽनुमानवैफल्यादनिश्चितसाध्यपक्षकेसर्वत्र
संभवितत्वादितिपोजनानान्यनुमानवैफल्येपितदनुमानस्यैवानुच्छेदान्नानुमानमा
त्रोच्छेद इत्यत आह। एवंचेति सफलानुमानेतिननुपक्षेतरत्वानुपाधित्वेतिकालेएवस
फलानुमानप्रवृत्तिसंभवेनसफलानुमानमात्रोच्छेदोपिनसंभवतीति। चेन्न। अनुमाने
सफलत्वंचवत्पक्षेतरत्वोपस्थितिकालेएवसफलानुमानप्रवृत्तिसंभवेनसफलानुमा
नमात्रोच्छेदोपिनसंभवतीतिचेन्न। अनुमानेसफलत्वंवत्पक्षेतरत्वोपस्थितिकालीन
त्वस्यापिविवेशात्। मान्यास्तुतत्रापिपक्षावृत्तेर्धर्मान्तरस्यमतानसीयवत्त्वादेरूपस्थि
तितिसंभवस्यैवएवंचमूलेपक्षेतरत्वपदंपक्षावृत्तित्वेनागृहीतधर्मपरमित्याहुः।
तेनैवसाध्यव्यापकत्वेसतीत्याद्युक्तरूपेणैवउक्तत्वादिति साध्यव्यापकत्वेनेत्यनेन

भवानं. टी.
५२

52

साध्यव्यापकत्वस्य तद्व्यतिरेकात्मकस्य इत्यनेन च साध्यनाव्यापकत्वस्योक्तत्वादिति भावः॥
यदि व्यभिचारोन्नायकत्वं व्यभिचारानुमितिस्वरूपयोग्यत्वं तद्दशारूपेले पाधित्वेन
तस्य दोषत्वेपि नानुमानमात्रोच्छेद इति ~~भावः~~ न हि वयमित्यादिमूलासंगतिरतो व्याचष्टे
व्यभिचारेति व्यभिचारानुमित्युपधायकः व्यभिचारानुमित्युपधायकव्यभिचारप्रति
योगित्वेन न एवं चेत्यादि तथा च यदि दशारूपेले पाधित्वेन दूषकत्वं मयोच्यते तदैवानुमा
नमात्रोच्छेद इति व्यभिचारानुमित्युपधायकत्वगर्भमुपाधित्वमेवासंभवि तत्रापि पक्षे
तरत्वोपाधेः संभवादित्युपाधेर्न दोषत्वमिति पूर्वपक्षः संभवतीति तदेव नेत्याशयः। तस्ये
ति। एवं च मूले तत्रेति पाठेपि संक्षेपे स मयीमूलार्थः ~~[illegible]~~ न हि वय राम
मित्यादिमूलार्थः मूले साध्यव्यावर्तकतयेति। तज्ज्ञानस्येत्यादिना दृशापक्षेतरत्वस्य ५२
तिरेकज्ञानस्येत्यर्थः साध्यवत्ताज्ञानप्रतिबंधकतयेति तत्त्वं तत्तदभावव्याप्यवत्ताज्ञान
मुद्रयेत्याशयेन व्याप्यत्वमेवोपपादयति मूले व्यापकव्यतिरेक इति। वस्तुतस्तु यावत्सा
नत्वात्। आवश्यकत्वात्। यद्वा साध्यवत्ताज्ञानप्रतिबंधकतयेति। स्वव्याप्तिस्वव्यतिरे

कत्रयोऽप्यसाध्याभावानुमितिस्वरूपयोग्यतयेत्यर्थः। सत्प्रतिपक्षोत्थापकत्वादिति यावत्। साध्य
व्यापकीभूताभाववत्ताज्ञानस्य साध्यानुमितिप्रतिबंधकत्वाद्यथाश्रुतमेव सम्यक्। शेषं पूर्ववत्।
व्याख्याद्वयेऽपि सत्प्रतिपक्षोत्थापकत्वेनोपाधेर्दूषकत्वं पर्यवसितं। वस्तुतस्तु ननु व्यापकव्य
तिरेकज्ञानं चेद्व्याप्यव्यतिरेकज्ञानात्मकं तर्हि व्यापकव्यतिरेकज्ञानप्रयुक्तसाध्यवत्ताज्ञानप्रति
बंधकत्वमुपाधेः संभवति तदेव नेत्यत आह। व्यापकव्यतिरेक इति। व्यापकव्यतिरेकज्ञानकाल
इत्यर्थः। व्याप्यव्यतिरेकस्येति। तज्ज्ञानस्येत्यर्थः। तथा च व्यापकव्यतिरेकज्ञानस्य व्यापकं व्याप्य
व्यतिरेकज्ञानमिति व्यापकसामग्रीविधया व्यापकव्यतिरेकज्ञानसामग्रीकाले व्याप्यव्य
तिरेकज्ञानसामग्र्या अपि आवश्यकत्वेन तत्र ज्ञानस्य सर्वत्र व्याप्यव्यतिरेकज्ञानात्मकत्व
मिति भावः। अत्राप्युपाधेर्दूषकत्वमुक्तरूपेण बोध्यं। केचित्तु उपाधित्वेनेत्यस्य यदि सत्प्रति
पक्षोन्नायकत्वेनेत्यर्थस्तदा किं त्वित्यादिना सत्प्रतिपक्षोन्नायकत्वेनैव दूषकत्वस्योक्तत्वादसं
गतिरित्यत आह दीधितौ स्वव्यभिचारेणेति मूले पक्षे साध्याभावावर्तकतयेति पक्षे साध्या
भावोन्नायकतयेत्यर्थः। तथा च सत्प्रतिपक्षोन्नायकत्वेनोपाधेर्दूषकत्वमिति भावः। न

प.वा.मं.टी.
५३
53

वानुमानमात्रस्योच्छेदे साध्याभावानुमितिरपि न संभवति तत्रापि पक्षेतरत्वस्योपाधित्वसंभवादिति
साध्याभावानुमितिजनकत्वरूपसत्प्रतिपक्षोन्नायकत्वेनोपाधेर्दूषकत्वं न संभवतीति वाच्यं
मसत्प्रतिपक्षे सत्प्रतिपक्षाभावादित्याहुः आरव्यायां प्रतिकूलतर्केति। साध्यं यदि पक्षेतरत्वे
निष्ठव्यापकताकं स्यात्तदाऽनिश्चितार्थनिर्णयान्न पक्षविशेष्यकज्ञानसामान्यकं स्या
दित्याकारकप्रतिकूलतर्कस्यार्थः। केचित्तु शीघ्रितैर्विरुद्ध्यादिति मल्लिमंत्रादिन्यायेनेतिशी
घ्रइत्याहुः अनुमानेनएवेति किंचिदंशत्यागेनेतिशेषः॥ ॥ तर्कग्रंथेति दुर्बोधे तार्किका
णां सुखबोधाय। या आरव्याऽरचितार व्याततयानुष्यंतु सज्जनाः॥ ॥इति श्रीमन्महादेव राम
विरचिते भवानंदीप्रकाशे तर्कग्रंथप्रकाशः॥ ॥इत्येव पाठइति॥ ॥ पंडितबालमु ५३
कुंदजी सिद्धपुरीमे वास॥ प[illegible]ध्यो ग्रंथने यापिकादिक रूप हो यजात॥१॥